This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ११२१४१ विषय धर्मशास्त्र

नाव शांतिकमलाकरः

लेखक / लिपीकार कमलाकरशर्मविरचित,

श्यामभट्ट लिखित

पृष्ठ २८० काळ शके १५५५ पूर्ण / ~~अपूर्ण~~

Checked 2012

श्रीपति कृतमधाकर १ ३०३१

॥ ॥श्रीगणेशाय नमः॥ ॥नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना। कमलाकरसंज्ञे
न प्रोच्यंते शांतयः क्रमात्॥ तत्र एवं विनायकं पूज्य ग्रहांश्चैव विधानतः॥ कर्मणां फलमा
प्नोति श्रियं चाप्नोत्यनुत्तमामिति याज्ञवल्क्येन सर्वकर्मांगत्वोक्तेर्विनायकशांतिरुच्यते॥ त्रा
धिकारिणामाह याज्ञवल्क्यः॥ विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः॥ गणानामा
धिपत्ये च रुद्रेण ब्रह्मणा तथा॥ तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत॥ स्वप्नेवगाहतेत्यर्थं
जलं मुंडांश्च पश्यति॥ काषायवाससश्चैव क्रव्यादांश्चाधिरोहति॥ अंत्यजैर्गर्दभैरुष्ट्रैः सहैक
त्रावतिष्ठते॥ व्रजन्नपि तथात्मानं मन्यतेनुगतं परैः॥ स्वविष्येपि॥ तैलार्द्रगात्रं विधुरं कर ॥
वीरविभूषितं॥ एवं स्वप्नानुक्त्वा प्रत्यक्षदर्शनान्याह याज्ञवल्क्यः॥ विमना विफलारंभः संसीद
त्यनिमित्ततः॥ तेनोपसृष्टो लभते न राज्यं राजनंदनः॥ कुमारी न च भर्त्तारमपत्यं गर्भमंगना॥
अंगना गर्भं न लभते गर्भिणी चापत्यं न लभते न जीवतीत्यर्थः॥ आचार्यत्वं श्रोत्रियश्च न शि

ष्पो ध्यायनं तथा ॥ वणिग्लाभं न चाप्नोति कृषिं चापि कृषीबलः ॥ स्नापनं तस्य कर्त्तव्यं पुण्यैरद्भिर्विधि
पूर्वकं ॥ तस्योपसृष्टस्यातेनोपसृष्ट एवाधिकारी ॥ स च शूद्रोपीति तस्याप्यधिकारः ॥ ब्राह्मणैः
क्षत्रियैर्वैश्यैः शूद्रैश्च सिद्धिकामुकैः ॥ कर्म निर्विघ्नसिध्यर्थं तु पूज्यो गजाननेति लैंगात् ॥ अतए
व महार्णवे यजमानस्य शूद्रश्चेद् द्विजैस्तां नियोजयेदित्युक्तं ॥ एवं स्त्रीणामप्यधिकारः ॥ अतए
वच्छहत्य राड्डारेण तेनोपहतपुंसा तु कर्म स्यान्निःफलं कृतं ॥ स्त्रीणामपि तथा सर्वं क्रियमा
णं तु निःफलमित्युपलक्षणं स्त्रीणामधिकारार्थमुक्तं ॥ अत्रापि कुमारीनवत्तर्चोरसि त्यादि
अत्र पुत्रत्वे स्त्रीमुक्तेपि हस्तपुष्याश्वयुक्सौम्यवैष्णवान्यतमे शुभे ॥ नक्षत्रे च त्र्युत्तरे च मैत्रे वा
ब्राह्मदैवते इति विष्णुधर्मे विनायकशांतौ विशिष्टान्यानि नक्षत्राणि ॥ शुक्लपक्षे च उक्तं च
वारे त्वधिपतेस्तस्य चातिशेषबवीरनक्षत्रे तस्यैव पुरतोन्यदपीति भविष्यपुराणे क्रयोग विरो
धाद्वेयाः विवाहादिकर्मजमुपसर्गनाशार्थं च यत्र क्वचिद्वा नक्षत्रे कृत्तिकादि विशाखारंपांतेय

रवौ

श्री

मूल्यंनहृत्त्वमितिस्मृत्युक्तेःकार्यंपुत्याद्यैरेवकुरुतेइत्युक्तेः॥वृहत्पराशरेपि।चतुर्थ्यां
शुक्लपक्षेतुअयनेचोत्तरेतथा॥पुत्र्यांर्थंसर्वेसिध्यर्थंकुर्याद्वांत्रिंविनापकौ॥वध्य
न्नाचस्नांदस॥याज्ञवल्क्यः॥गौरसर्षपकल्केनसाज्येनोत्सादितस्यच।सर्वौषधैःस
र्वगंधैर्विलिप्तशिरस्तया॥भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाःशुभाः॥उत्सादित
स्यउद्वर्त्तितस्य।सर्वौषधानिच।मुरामांसीवचाकुष्ठंशैलेयंरजनीद्वयं॥सटीचंपक
मुस्ताचसर्वौषधि॥गणःस्मृतइतिमहा॥शैवोक्तानि॥कुष्ठंमांसीहरिद्रेद्वेमुराशैले
यचंदनं।वचाचंपकमुस्तेचसर्वौषध्योदशस्मृताइतिछंदोगपरिशिष्टोक्तानिचयद्या
णि।तत्रैवरूढेः।मुरामारोलोष्णुणोमोहरीसइतिप्रसिद्धा।शैलेयंशिलाजं॥सर्वगंधाउक्ताः
हेमाद्रौमदनरत्नेचगारुडे॥कर्पूरंचंदनंदर्पःकुंकुमंचसमांशकं॥सर्वगंधमितिप्रोक्तं
समस्तसुरवल्लभमिति।मदनरत्नेतुचंदनकुंकुमागुरुकर्पूरकस्तूरिकाजातीफलानिस

भल्लो गुरुकाक्षे द्रद्गुरो गुरुः॥ क्रोधः शि पि॥ न [illegible] अंकः॥ वा कुल्ले य स्कं॥ नेद कुथारा [illegible]॥ १

तथा

वर्गघातकाः तत्र मूलं चिंत्यं॥ अश्वस्थानाद्गजस्थानान्नोद्वल्मीकासंगमाद्ध्रदात्॥ मृत्तिकां
रोचनां गंधान्गुग्गुलुं वाप्सु निक्षिपेत्॥ याम्याहुताह्येकवर्णैश्चतुर्भिः कलशैर्हृदात्॥ गंधा
न्सर्वान्वै गंधान्॥ अत्र विशेषमाह पारस्करे बैजवापः॥ चतुःप्रस्रवणेष्वश्वत्थेतुरः कुंभा
नाहृत्य तेषु सर्वौषधीः सर्वगंधान्॥ हिरण्यं व्रीहियवौ गुग्गुलुं मृदमारक्तकेसरमिति॥
क्षिपेदिति शेषः॥ किंच॥ चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः॥ इदं च पूर्वं स्थाप्यं॥ पूर्वं वि
योजोक्तेः॥ तत्रैकहस्ता वा चतुरंगुलोच्चा वेदी कार्येति केचित्॥ तच्चिंत्यं वेद्यां मानाच्च
वात्॥ करणेपि हस्तोन्मुक्ता॥ यत्र होमोत्तरमभिषेकस्तत्रोत्तरतः पूर्वतो वा कार्यः॥ अत्र
त्वभिषेकोत्तरं होमः॥ अतः पूर्वं नो होमः पश्चाच्च भद्रासनं कार्यं॥ प्रागुदग्विवाकर्म
णीति कात्यायनोक्तेः॥ तेनोत्तरतः स्नानपीठं दक्षिणे होमश्च स्मरवर्णांहेयः॥ दक्षिण
संस्थानं पत्ते॥ सहस्राक्षं शतधारमृषिभिः॥ पावनं कृतं तेन त्वामभिषिंचामि पावमा ×

त्रमध्ये स्वस्तिकं कृत्वा तत्र रक्तमानडुहं चर्मप्राचीनग्रीवमुत्तरलोमास्तीर्य तत्र श्रीपर्णीपीठं तदुपरि स्थापयेत् [illegible] मिति
[illegible] तस्य पश्चाद्दिक्चतुर्दिक्षु चतुरः कलशान्संस्थाप्य तेषु चतुरः [illegible] पीठे [illegible] प्रतिमयोर्गणेशादि
[illegible] अपराह्णे [illegible] पादिने [illegible]॥ [illegible] संकल्प्य [illegible] मंत्रेण [illegible]

हस्ताधि
श्रीपु

[illegible]

ते
द

न्यः पुनंतु ते।। नगं तेब रुत्तो राजा नयं सूर्यो बहस्पतिः। नगमिंद्रश्च वायुश्च नगं सप्तर्षयो ददुः।।
यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि।। ललाटकर्णयोरक्ष्णोरापस्तद्घ्नंतु सर्वदा। एकैको
मंत्रः कुंभत्रये। त्रिभिश्चतुर्थकुंभः सर्वैर्मंत्रैश्चतुर्थमिति चोले दर्शनादिति विज्ञानेश्वरः। त्रिभि
रेकैकः कुंभ इत्यपरार्कः।। स्नातस्य सार्षपं तैलं स्रुवेणौदुंबरेण तु।। जुहुयान्मूर्धनि कुशान्स
व्येन परिगृह्य च।मितश्च संमितश्चैव तथा शालकटंकटौ।। कूष्मांडो राजपुत्रश्चेत्यंते स्वा
हासमन्वितैः। नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः। यजमानमस्तके मितादिना
मभिस्तैलं हुत्वा तैरेव चरुं च हुत्वा तच्छेषेणेंद्रादि दिक्पालेभ्यो नामभिर्बलिं द
द्यादिति विज्ञानेश्वरः। महार्णवे। पूर्वोक्तैर्मीनाम।भिस्तैलं हुत्वा तैरेव चरुं हुत्वा कृतादिबलि
दानं न तु चरुहोम इत्यपरार्कः। बृहत्पराशरोपि नामभिश्च बलिं दद्यान्नमस्कारसमन्वि
तैरिति मितादिनामभिर्बलिमाह।। दद्याच्चतुष्पथे सूर्पे कुशानास्तीर्य सर्वतः।। कृताकृतां
स्तंडुलांश्च पललौदनमेव च।। मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु।। कृताकृता

पानासीनात २

१८
१८

अवहताः अनवहताश्च ॥ पललं ~~तिलं~~ तिलपिष्टं मांसमिश्रमन्ये । तन्मिश्र ॐ ओदनः । ९ ता
वत्पद्यमार्मैव ॥ पुष्पं चित्रं सुगंधं च सुरां च विविधामपि त्रिविधा गौडी माध्वी पैष्टी वा ए
नां तद्रूपरां सत्र वैस्याध्यां पैष्टी विशेषेण तु सर्वापि वर्ज्येति महार्णवः । तन्नामाना चावादः ॥ य
तुर्वर्णाधिकारात् । न च नराश्वमेधौ मघं च कलौ वर्ज्यं द्विजातिभिरिति निषेधः । तस्य
सौत्रामण्यामपि सुराग्रहणस्य च संग्रह इत्यनेनोपसंहारात् । हेमाद्रिस्तु निषेधस्य नि
वृत्तिमात्रार्थत्वेन विशेषानपेक्षणान्नोपसंहारः ॥ विशेषनिषेधस्तु दोषाधिक्यार्थ इत्या
ह । अतः स्तदानावेश्यैर्द्विजैश्च पयो ग्राह्यं ॥ सौत्रामण्यां तु पयोग्रहा वा स्युरिति आपस्तंबे
न विकल्पाभिधानात् । तच्च सैंधव-मिश्रमिति महार्णवादयः शिष्टाः ॥ मूलकं पूरिकापूपा
स्तथैवोंडेरकस्रजः । दध्यन्नं पायसं चैव गुडपिष्टं समोदकं ॥ मूलकं प्रसिद्धमिति महार्णवः ॥
तदाकारः पिष्टविकार इति मदनरत्नविज्ञानेश्वरौ । अपूपः स्नेहपक्वो गोधूमविकारः । पु

श्री
॥४॥

उंडेरकस्रजः शुष्कापूपा इत्यपरार्कः॥ वर्तुलैश्चतुरस्रैश्च दीर्घैः पिष्टविकारकैः। निर्मिताः
स्रज उच्यंते उंडेरकसमाख्याश्चेति महार्णवे मदनरत्ने च गुडमिश्रं पिष्टमित्यर्थः मोद
काः पैष्टा इत्यपरार्कः। लड्डुकाः इति मदनरत्ने॥ रहस्यराशावरे॥ कुल्माषाः फलानि चा
धिकान्युक्तानि। बलिमंत्राः प्रयोगे वक्ष्यंते॥ एतान्सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः। शि
शूर्पे निःधाय निक्षिपेदित्यर्थः॥ विनायकस्य जननीमुपतिष्ठेत्ततोंबिकां॥ दूर्वासर्षप
पुष्पाणां दत्वार्घ्यं पूर्णमंजलिं॥ दूर्वादिपूर्णमंजलिं सजलं विनायकजन्यांबिकायै चार्घ्यं द
त्वोपतिष्ठेतेत्यर्थः। रूपं देहि यशो देहि सौभाग्यं भगवति देहि मे पुत्रान्देहि धनं देहि हि
सर्वकामांश्च देहि मे॥ विनायकोपस्थानेऽनु भगवन्निस्स्पृहः इति विज्ञानेश्वरः। संनु स त सम
मानविधानत्वात्प्रहति विकारान्नावकाशं स्यादिति चिंत्यं। अतएवांबिकामित्युक्तं त ॥४॥
तः शुक्लांबरधरः शुक्लमाल्यानुलेपनः। ब्राह्मणान्भोजयेद्द्याद्वस्त्रयुग्मं गुरोरपि॥
द्य घा

नमोगणेशायनमः

एवंविनायकंपूज्यग्रहांश्चैवविधानतः॥ कर्मणांफलमाप्नोतिश्रियंचाप्नोत्यनुत्तमां॥
यजमानाभिषेकस्नानंचाचार्याय दद्यात्॥ आत्मनोवासस आचार्याय दद्यादिति मदनरत्ने
बैजवापोक्तेः॥ अथप्रयोगः॥ पूर्वेद्युःशुभदिने कर्ता देशकालौ स्मृत्वा विनायको
पसर्गशांत्यर्थममुककर्मणि निर्विघ्नतासिध्यर्थममुकफलसिध्यर्थं लक्ष्मीप्राप्त्यर्थं वा मान्न प
रि विनायकशांतिं करिष्य इतिसंकल्प्य गणेशपूजनपुण्याहवाचनं वृद्धिश्राद्धं निर्वर्त्या
च चार्यं वृ चातुरः पराशरमतेष्टौ वा ऋत्विजो वृणुयात्॥ तेषु चत्वारः स्वस्तिवाचकाइ दु
तिमदनरत्ने॥ अथाचार्यः पंचवर्णैः शुक्लैर्वा पिष्टैर्मध्ये स्वस्तिकं कृत्वा तदुपरिरक्त
मानडुहंचर्म प्राचीनग्रीवमुत्तरलोमास्तीर्य तत्र श्रीपर्णीकाष्ठजंपीठंसंस्थाप्य तत्रैश्वेतं
वस्त्रमाच्छाद्य तदुपरि दिक्षुचत्वारि स्वस्तिकानि कृत्वा तेषु प्रागादितः मही द्यौरित्यादिना का
नले समयेन एकवर्णांश्चतुरः कुंभान्॥ धान्यराशौ निधाय ह्रदोदकेन नदीसंगमाद
ठा ठो ठं

श्री
॥ध॥

बा य

केनवापूर्णा उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ मृत्तिके हर मे पापं यन्मया दुःकृतं कृ
तमितिमंत्रेण तेषु पंचमृदः क्षिप्त्वा। गंधद्वारामिति चंदनागुरुकेसर कस्तूरीकर्पूरादी क
नगंधाव गोरोचनां गुग्गुलुं च निक्षिप्य। अश्वत्थे वट इति पंचपल्लवान्निक्षिप्य चंदनमा॥
न्रक लान्नृषिनाकेश्चायाः फलिनीरिति फलं सहिरत्नानीति पंचरत्नानि हिरण्यरूप इति
हेमक्षिप्त्वा। युवा सुवासा इति वस्त्रेणावेष्ट्य पूर्णादर्वीति पूर्णपात्रं निधायैवं चतुर्दि
क्षु कृत्वा प्रतिकलशं कलशस्य मुखे देवदानव इत्यादि पठेत्॥ ततश्चतुर्दिक्षु चत्वा
रऋत्विजः चान्तो अग्नेइति वरुणमावाह्य षोडशोपचारैः संपूज्यापो नद्याः शंनोवा
तः पवतामित्यादि स्वशाखोक्तं सूक्तं शांतिं पठेयुः ततश्चाचार्यो ब्रह्मा सदस्य पूर्वेतो सं. म. ॥ध॥
होमार्थं स्थंडिलं कृत्वा तदीशान्यां हस्तमात्रं वेदिकायां पीठं वस्त्रादौ तत्पुरुषा
य विद्महे वक्रतुंडाय धीमहि॥ तन्नो दंतिः प्रचोदयात्॥ इति विनायकं॥ सुभगायै विद्म

त्रु २ न २

नदाः। एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥८ तैर्मंत्रैः प्रतिमंत्रं अभिषिच्य ततो हिरण्यवर्णा
भिरिति श्रीसूक्तेन इमा आपः शिवतमा इति त्रिभिः देवस्य त्वेति च यजुषा ऋ वरुणः स्वरिति व्या
हृतिभिश्चाभिषिक्तो यजमानो न्याहत वस्त्रयुग्मं गंधमाल्याभरणं च धृत्वा ततो यजमा
नः आचार्येण दिक्षु विदिक्षु च दिक्पालग्रहादिभ्यो माषभक्तबलीन्दत्वा सुवासिनीभि
र्नीराजनं कारयित्वा ग्रहाणामुत्तरपूजांतेभ्या हस्तेश्चारण कर्यकं ग्रहोद्वासनं आचा
र्येण कारयित्वा स्वयं वा कृत्वा आचार्यादिभ्यो जपहोमफलं गृहीत्वा तेभ्यो दक्षिणां द
द्यात्। गौः। शंखः। रक्तोनड्वान्। हिरण्यं। पीतं वासः। श्वेताश्वः। कृष्णा गौः। कालाय ४८
सं। हस्ती छागो वेति ग्रहक्रमेण। अत्र न्यूनदक्षिणा बुधदक्षिणा वा हिरण्येन समाको
पी। आपद्गतवाना। एतदसत्वे सर्वेभ्यो यथाशक्ति हिरण्यं वा प्रदद्यात्। आचार्याय द्वि
गुणां। अन्येभ्यश्च यथाशक्ति भूयसीं। ततः कांस्यपात्रगताज्ये रूपं रूपं प्रतिरूपो बभू

हरतु वा इति वा पाठः। आत्मनोऽभिषेके तेस्थाने मे ऊहः। अथ देवमंत्राः। सुरास्त्वामभिषिंचंतु ब्रह्म
विष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय
ते॥ आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा। वरुणः पवनश्चैव धनाध्यक्षस्तथा शि
वः। ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा। कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रि
या मतिः। बुद्धिर्लज्जा वपुः शांतिः क्षांतिस्तुष्टिश्च मातरः। एतास्त्वामभिषिंचंतु देवपत्न्यः स
मागताः। आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः। ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च
तर्पिताः। देवदानवगंधर्वयक्षराक्षसपन्नगाः। ऋषयो मनवो गावो देवमातर एव च॥
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः। अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि
च। औषधानि च रत्नानि कालस्यावयवाश्च ये। सरितः सागराः शैलास्तीर्थानि जलदा

वेति मंत्रेस्य ॐ दंवः स्वरूपं प्रेक्ष्य । आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं । आज्यं सुरा
णामाहार आज्ये देवाः प्रतिष्ठिताः इति मंत्रं पठित्वा तदाज्यं सदक्षिणं ब्राह्मणाय दद्यात् ततो
स्तीर्दक्षिणां दत्वा संकल्प्य वा एकस्या आहुतेरेकं शतस्यैकं सहस्रस्य वारकं यथा
शक्तिवा ब्राह्मणान्भोजयित्वा तेभ्यः शांतिः पुष्टि आस्त्विा । त्या याचाशिषो गृहीत्वा तान्संप्रा
र्थ्य प्रणिपत्य । यस्य स्मृत्येति मंत्रं पठित्वा । प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । स्म
रणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः इत्येकोन्यूनातिरिक्तच्छिद्रत्वार्थं यथाशक्ति
अच्युतानंतगोविंदेति नामत्रयं जपं कृत्वा ततः सदस्यान्दक्षिणादिभिः प्रणिपत्य
अंजलिं बध्वा मया यत्कृतं ग्रहहोमाख्यं कर्म तत्कालहीनं भक्तिहीनं श्रद्धाहीनं च भ
वतां वचनात् तत्सर्वं संपूर्णमस्तु अच्छिद्रं चास्तु इति प्रार्थयेत् । ततस्ते संपूर्णमस्तु अच्छिद्रं
चास्तु ऽपच्छिद्रं तपच्छिद्रं यच्छिद्रं यज्ञकर्मणि । सर्वं भवतु तेऽच्छिद्रं यस्य चेच्छंति वै द्विजाः ।

ततस्तेषां मंत्राशिषो ग्रहीत्वा तान् सानुनयं विसृज्य ब्राह्मणान् भोजयित्वा दीनानाथांश्चा
न्नादिना संतोष्य स्वयं हृष्टमना बंधुभिः सह भुंजीत। अयं चाश्वलायनगृह्यपरिशि
ष्टोक्तो ग्रहमखः आश्वलायनानामेव। बह्वृचां वा स्वगृह्योक्तरूपस्य कर्मप्रयोगितां
तस्य तावतीत्वा। एकार्थे कृते सर्वः कृतो भवेद् इति वचनाद्। एवमन्येषामपि यदि
स्वगृह्यपाद्यानुक्तस्तदा स एव। येषां गृह्ये नोक्तस्तैर्याज्ञवल्क्यादिस्मृत्युक्तः म
त्स्यपुराणोक्तो वानुष्ठेयः स्मृत्यादेः साधारण्यादिति। अयं तु चानुकल्पो लौ
किकाग्नौ कार्यो न गृह्ये। येषां गृह्येऽनुक्तः स्तादभावे वा सर्वार्थं गृह्योत्पत्तिः तै
कातीयाचैरैच्छिक एवेति दिक्॥

हेकाम्रमालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्। इत्यंबिकां च हैमप्रतिमायामावा॥ हयेत्। अपरार्के
त्वविषेचेन्या अपि देवता उक्ताः॥ व्योमकेशं तु संपूज्य पार्वतीं नीमजं तथा॥ रुक्मास्यपितरं
तात अर्कमारं सितं तथा॥ धिषणं क्लेदपुत्रं च कोणं लक्ष्मौं च भारत॥ विधुंतुदं बाहुलेयं नं
दकस्य च धारिणं॥ व्योमकेशः शिवः। नीमजो गणेशः। आरो भौमः सितः शुक्रः धिषणो
गुरुः क्लेदपुत्रो बुधः। कोणः शनिः लक्ष्मचंद्रः॥ बाहुलेयः स्कंदः नंदकधारी विष्णुः। तत्पुरि
तो यथावकाशं प्रतिमास्वक्षतपुंजेषु वा व्योमकेशं पार्वतीं नीमजं। वसुदेवा अर्कं मं
गलं॥ शुक्रं। बृहस्पतिं। बुधं शनैश्चरं। चंद्रं। राहुं॥ बाहुलेयं विष्णुं। एतानुं इंद्रादि
लोकपालांश्चावाह्यो सौनादिनैवेद्यांतैरुपचारैः संपूज्य तद्वासनस्य पूर्वतः स्थंडिले
ग्रहोक्तविधिनाग्निं प्रतिष्ठाप्यान्वादध्यात्॥ केचित्तु ग्रहमखमेतत्समानतंत्रं कुर्वंति। तु त
विधिनायकादुहैरेज्ञलावाहनं कुर्यात्॥ तत्रान्वाधाने वक्ष्यंतमुक्त्वा अत्र प्रधानं ग्रहाः समिदाज्ये

न१. ग्यार

श्री
॥६॥

वरुभिः मिमिलं संमितं गोलं कदंकदं रूप्यां उंराज्ञपुत्रं वैवै कयावर्वाकृत्वा ओमकेनाद्दी
या२ नेके कं वर्वाकृत्वा तोषेणा[illegible] हुकृतमित्यादि चतुरस्रयपिर्लेब र्हिष्या सायग व्याडयत्वोल्लिते
न गौरसर्षपकल्केनो द्वर्त्तितं सर्वांगं पूर्वोक्तैः सर्वौषधैः सर्वगंधैश्च विलिप्त शिरस्सं
यजमानमाचार्यो मंगलवेद घोषैर्भद्रासन उपवेशयेदिति विज्ञानेश्वर महार्णवादि
यः। बृहस्पतिराज्ञोप्येवं महोउवेश्योद्धर्तयेदिति मदनरत्ने उक्तं। ततो यजमानः पूर्ववद्
तैः — चतुर्भिर्ब्राह्मणैः सहस्वस्तिवाचनं कुर्यात्। ततः जीवपत्नीभिः पुत्रान्वितैः सुवेषाभिः स्त्रि
भिर्नीराजनं कार्यं॥ ताभ्यश्च यजमानः वस्त्राणि कंचुकानि च दद्यादित्याचारः। ततः आ
चार्यः पूर्व देशस्थं कलशमादाय सह स्याद्दश्वाते धारयत्विग्भिः। पावनं कृतोते नत्वा ॥६
मन्त्रैरभिषिंचामि पावमान्यः पुनंतु इति मंत्रेण यजमानमभिषिंचेत्॥ नगते वरुणो राजा
नगं सूर्यो बृहस्पतिः॥ नगमिंद्रश्च वायुश्च न गं सप्तर्षयो ददुरिति दक्षिणकुंभेन

ते२ वि१

६२

ततः यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि॥ ललाटे कर्णयोरक्ष्णोरापस्तघ्नंतु सर्वदा इति प
ञ्चमकुंभेन ततउत्तरकलशमादाय सहस्राक्षमित्याद्यैस्त्रिभिर्मंत्रैरभिषिंचेत्॥ अपराके महेत्रे
त्रिभिरेकैककुंभेनाभिषेकः॥ ततश्चतुर्भिर्मिलितैः कुंभैर्वैत्यराशारोमैरभिषिंचेत्॥ एतद्वैपा
वनं स्नानं सहस्राक्षं ऋषिस्स्टतं तेन त्वा शतधारेण पावमान्यः पुनर्विमाः। शक्रादि दशदिक्पा
[illegible]ला ब्रह्मेशाः केशवादयः॥ आपस्ते घ्नंतु दौर्भाग्यं शांतिं कुर्वंतु सर्वदा सुमित्रिया
नआप ओषधयः संतु दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यंचवयंद्विष्मः। समुद्रगा गिरयो
नद्यो मुनयश्च पतिव्रताः॥ दौर्भाग्यं घ्नंतु ते सर्वे शांतिं यच्छंतु सर्वदा॥ पादांगुल्योर्जंघास्य नितं
बोदरे नाभिषु॥ स्तनोरोबाहुहस्ताग्रग्रीवास्ये सांगसंधिषु॥ नासाललाटकर्णेषु केशांतेषु च
मत्स्थितं॥ तदापो घ्नंतु दौर्भाग्यं शांतिं यच्छंतु सर्वदा॥ ततआचार्यः प्राङ्मुखो यजमानस्य पश्चात्ति
ष्ठन्सव्यपाणिना कुशान्यजमानमूर्द्धनि निधायतच्च सार्षपं तैलमौदुंबरेण स्रुवेणादाय॥

स२. स्य

श्री॥

।ग्रा।

आश्वर्ने।ता कौ शिाकृग्र पपरि शिाब्र योरस्वि वे॥७

ॐ मिताय स्वाहा॥ मितायेदमिति यजमानः एवमग्रेपि तु संमिताय स्वाहा ॐ शालाय स्वाहा ॐ कटं
कटाय स्वाहा॥ ॐ कूष्मांडाय स्वाहा॥ ॐ राजपुत्राय स्वाहेति षडाहुतीर्जुहुयात्॥ अपरार्कमते तु शा
लकंटंकटाभ्यामेका॥ कूष्मांड राजपुत्राय चैकाहुतिरिचतस्रः॥ ततः वक्ष्मो इच्छ्या धानादि कृत्वा
पूर्वोक्तैः पाकद्भिः मंत्रैरग्नौ च रुद्रहुत्वा व्योमकेशादिभ्यश्चैकैकाहुतिं चास्विष्टकृदादिप्रायश्चित्तहोमांते मां
ते पूर्वादिदिक्षु इंद्रादिदशलोकपालेभ्यो नाममंत्रैश्चरुशेषेण बलिं दत्वा शुद्धोदकेन स्नातो धौता
बरधरो यजमानः साचार्यो विनायकमंबिकां च पूर्वोक्ततद्गायत्रीभ्यां षोडशोपचारैः संपूज्य कृ
ताक्षततंडुलान्तिलपुष्पोदनं पक्वापक्वमत्स्यांस्त्रिविधसुरां तदभावे सैंधवयुतं पात्रत्रये क्षीरं
पक्वान्नं पंचमांसं मूलकापूपपूरिकोंडेरकं दध्यन्नं पायसं गुडमिश्रपिष्टं मोदकलड्डुकं विचित्रसुगं
धपुष्पं कुल्माषफलानि चैकपात्रे शूर्पे वा कृत्वा पूर्वोक्तमंत्रेण विनायकायैतमुपहारं निवेदया
मीत्युपहारं विनायकायैवमंबिकायै च दत्वा कुसुमगंधदूर्वासर्षपसहितेनोदकेनांजलिमापू

रा:

।७

४रूपंदेहियशोदेहिभगंभगवन्देहिमे।पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमे इतिविनायक॥१७

यंप्रत्येकंपृथगुक्तमंत्राभ्यामर्घ्यंदत्वादूर्वासर्षपपुष्पांजलिंचमंत्राभ्यांदत्वानमौशिरःकृत्वा
तिदे२ रूपंदेहियशोदेहिभगंभगवन्देहिमे।पुत्रांदेहिधनंदेहिसर्वकामांश्चदेहिमे।इत्यंबिका
चोपतिष्ठेत[illegible]हस्तपरा[illegible]रोमुखांतरमाह॥ सौभाग्यमंबिकेदेहिरूपंभगंयशोपिचाखि
यंपुत्रांश्च[illegible]मांश्चतथाशौर्यंचदेहिमे॥ गतेशमातरंबालेयच्चिंचिन्मुदंत्नीसितं॥ एव
नाम्नैवत[illegible]हिदेहिगौरिवरान्ममेति॥ अर्घ्यदानमुपस्थानं~~बालेयंसिति~~विवचतुष्प
थेबल्यनंतरंकार्यमितिमदनरत्ने॥ ततआचार्यःशूर्पेकुशानास्तीर्यकृताकृताद्युप
हारंतत्रनिधायचतुष्पथेनुवमन्तुद्धयोंकुशानास्तीर्यतत्रमंत्रोक्तादेवताःसंपूज्यतत्र
शूर्पेनिधायबलिंबलिंदद्यात्॥ मंत्रास्तु॥ बलिंगृह्णंत्विमंदेवाआदित्यावसवस्तथा॥
मरुतोऽश्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः॥ असुरायातुधानाश्चपिशाचामातरोरगाः।
शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः जंभकाःसिद्धगंधर्वानागाविद्याधरानगाः॥

शां
टी।

पूर्णाहुतिं कुर्यात् ३

दिक्पालाँल्लोकपालाश्चयेचविघ्नविनायकाः।जगतांशांतिकर्त्तारोब्रह्माद्याश्चमहर्षयः॥
माविघ्नंमाचमेपापंस्यमासंतुपरिपंथिनः॥सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः॥ततोय
जमानोऽह्नमागत्यपादौप्रक्षाल्याचम्याचार्यंसंपूज्यतस्मैधेनुंगांहेमचदक्षिणांदत्वाचार्यऋत्वि
ग्भ्योयथाशक्त्यान्येभ्यश्चभूयसींदत्वाविनायकांबिकयोरुत्तरपूजांकृत्वाविसृज्याचार्याय
दत्त्वाग्निंसंपूज्यविभूतिंधृत्वाग्निंविसृज्यब्राह्मणान्भोजयित्वाकर्मेश्वरार्पणंकुर्यात्॥इति
नारायणभट्टसूरिसूनुरामकृष्णभट्टसूनु॥कमलाकरभट्टकृतेशांतिरत्नेविनायकशां
तिः॥हेमाद्रौतुविशेषश्चचतुर्थ्यांवारतांहेमंपालाशंदूर्वांतुशमीपत्रं॥कारयित्वांकुशायुतंतिल
द्रोणोपरिस्थापयेत्॥वस्त्रैःपुष्पैःपूजयित्वानैवेद्यंविनिवेदयेच्च॥ततस्तुब्राह्मणेदद्याद्गणेशः
प्रीयतामितिकार्यारंभेषुसर्वेषुतस्यविघ्नंनजायते॥तेनविनायकशांत्याविकल्पः॥वारणाः
सप्तजन्मानिभवंतिमदविह्वलाः॥इदंचैत्रे॥श्रावणेकार्तिकेवाकार्यमितिहेमाद्रिः॥अथसर्व
शांतिकप्रकृतित्वाद्ग्रहयज्ञउच्यते॥स्कादयाज्ञवल्क्यौ॥श्रीकामःशांतिकामोवाग्रहयज्ञंसमा

राम
।टी।

त्रयो

चरेत्॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि॥ स चतुर्धा॥ केवलः अयुतहोमो लक्ष
होमः कोटिहोमश्चेति॥ आद्यो याज्ञवल्क्याद्यैरुक्तः॥ अन्यौ न्यैमात्स्येउक्ताः॥ ग्रहयज्ञस्त्रिधा
प्रोक्तः पुराणश्रुतिचोदितः प्रथमोयुतहोमः स्याल्लक्षहोमस्ततः परः॥ तृतीयः कोटिहोम
स्तु सर्वकामफलप्रदः॥ त्रिविधा॥ नैमित्तिकाः काम्याश्च तद्वदेवात्तत्रैव॥ ग्रहस्[illegible]स्योत्तरपूर्वे
णमंडपं कारयेद्बुधः॥ रुद्रायतनतो वा चतुरस्रमुदक्प्लवं॥ दशहस्तमथाष्टौ वा हस्ता
न्कुर्याद्विधानतः॥ तस्य द्वाराणि चत्वारि कुर्त्व्याणि विचक्षणैः॥ मंत्रमुक्तावल्यां॥ चतुर
स्रोऽथ तु द्वादशाष्टहस्तादितस्त्रयः चतुर्विंशतिहस्तांता हीनमध्योत्तमाः क्रमात्॥ यद्वा द्वा
दशहस्ताद्याद्वितस्ला॥ वृद्धितो नव॥ अष्टाविंशतिपर्यंताः केश्चिदुक्तोमानीषिभिः॥ अग्नि
पुराणेप्येवं॥ अयं मंडपः काम्ये नियो नैमित्तिकादौ॥ नित्यं नैमित्तिके हित्वा सर्वमन्यसमं मं
डपमिति शारदातिलककारः॥ कुंडमंडपप्रकारोऽस्माभिश्चरूनप्रयोगदीपिकायांमल्लतेदानव

ए॥

मल्लाकैरेव ज्ञेयः॥ स्कांदे। नवग्रहमखे कुंडं हस्तमात्रं समं भवेत्॥ चतुरस्रमधो हस्तं योनि
वक्त्रं समेखलं॥ चतुरंगुलविस्तारमेखलात्रितयोच्छ्रिता॥ मानहीनाधिकं कुंडम
नेकभयदं स्मृतं॥ योनिर्मात्स्यो॥ वितस्तिमात्रा योनिः स्यात्षट्सप्तांगुलविस्तृता॥ कूर्मपृष्ठो
पृ ४ न्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता॥ गजोष्ठसदृशी तद्वदायता छिद्रसंयुता॥ मेखलोपरि स
र्वत्र अश्वत्थदलसन्निभा॥ कुंडनाभे स्थंडिलं वा॥ नित्यं नैमित्तिके होमे स्थंडिले वा समा कार्य
चरेदिति शारदातिलकात्॥ कुंडमेवं विधां तस्या स्थंडिलं वा समाश्रयेदिति प्रपंचसाराच्च स
स्कांदे॥ तस्य वोत्तरपूर्वेण स्थंडिलं हस्तमात्रकं॥ तस्य कुंडस्य॥ स्थंडिलं वेदी॥ द्विवप्रं च एए
य ३ तुरस्रं च वितस्त्युच्छ्रसंमितं॥ द्व्यंगुलोच्छ्रितो वप्रः प्रथमः स्यसमुद्धृतः॥ अंगुलोच्छ्राय॥ ए॥
संयुक्तं वप्रद्वयमथोपरि॥ द्व्यंगुलस्तत्र विस्तारः॥ सर्वेषां कथितो बुधैः॥ नवग्रहम
खेकुर्याद्द्विजश्चतुरस्रकान्॥ अथवा[illegible]ौ चिंतनासांतो द्वावेव स्मृतिकोविदैः॥ एवं पुनले
१ वैकमप्यवेद्विधिना ज्वलनेन सह॥ मदनरत्ने स्कांदे॥ द्वावेवौ नवग्रहमखे विप्रा अथवारो वेदवा

१ नः॥ अथवाश्र २ ४ कार्याः

मेखलुनप्रसज्ञेनविस्तरे॥ वेद्यांसंनिवेसर्वतोभद्रंकार्यं। मंडलंसर्वतोभद्रमेतत्साधा
रणंस्मृतमितिशारदातिलके॥ मात्स्ये। पुण्येह्निविप्रकथितेकृत्वाब्राह्मणवाचनं॥
अग्निप्रणयनंकृत्वावेद्यामावाहयेत्सुरान्। देवतानांतुसंस्थाप्याविंशतिर्द्वाद
शाधिका। आदित्याभिमुखाःसर्वेसाधिप्रत्यधिदेवताः॥ प्रतिमाश्चाहयाज्ञव
ल्क्यः॥ ताम्रकास्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ। रजतादयसःसीसात्कांस्या
कार्याग्रहाःक्रमात्॥ स्ववर्णैर्वापटेलेख्यागंधैर्मंडलकेषुवा॥ मात्स्ये॥ पद्मासनः
पद्मकरःपद्मगर्भसमद्युतिः। सप्ताश्वःसप्तरज्जुश्चद्विभुजःस्यात्सदारविः। श्वेतःश्वेतां
बरधरोदशाश्वःश्वेतभूषणः। गदापाणिर्द्विबाहुश्चकर्तव्योवरदःशशी। रक्तमाल्यां
बबरधरःशक्तिशूलगदाधरः। चतुर्भुजोमेषगमोवरदःस्याद्धरासुतः॥ पीतमाल्यां
बरधरःकर्णिकारसमद्युतिः॥ खड्गचर्मगदापाणिःसिंहस्थोवरदोबुधः। देवदैत्यगु

कृतहस्तौ तथैतौ चतुर्भुजौ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू॥ इंद्रनीलद्युतिः
शूली वरदो गृध्रवाहनः॥ बाणबाणासनधरः कर्त्तव्योऽर्कसुतः सदा॥ करालवद
व नः खड्गचर्मत्रिशूली वरप्रदः॥ नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते॥ धूम्रा द्वि बा
बाहवः सर्वे गदिनो विकृताननाः॥ गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥ सर्वे
किरीटिनः कार्या ग्रहा लोकहितावहाः॥ स्वांगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा॥
स्कांदे॥ जन्मर्क्षं गोत्रमग्निश्च वर्णस्थानमुखानि च॥ योऽज्ञात्वा कुरुते शांतिं ग्रहास्ते
नावमानिताः॥ उत्पन्नोऽर्कः कलिंगेषु यमुनायां च चंद्रमाः॥ अंगारकस्त्ववंत्यां च म
गधायां हिमांशुजः॥ सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा॥ शनैश्चरस्तु सौराष्ट्रे
राहुर्वैराटिनापुरे॥ अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः॥ आदित्यः काश्यपे गो
त्रे आत्रेयश्चंद्रमा भवेत्॥ भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः॥ गुरुश्चैवांगि

रोगोत्रः शुक्रो वै भार्गवस्तथा॥ शनिः काश्यप एवाथ राहुः पैठीनसिस्तथा॥ केतवो जै
मिनीयाश्च यतोग्निस्तदनंतरं॥ आदित्ये पिंगलो नाम पिंगलः सोम उच्यते॥ धूमकेतु स्त
था भौमे जठराग्निर्बुधे स्मृतः॥ गुरौ चैव शिखीनाम शुक्रे भवति हाटकः॥ शनैश्च
रे महातेजा राहोः केतोर्हुताशनः॥ भास्करांगारकौ रक्तौ शुक्लौ शुक्रनिशाकरौ॥ सो
मपुत्रो गुरुश्चैव तावुभौ पीतकौ स्मृतौ॥ कृष्णं शनैश्चरं विद्याद्राहुं चित्रं च केतवः॥ गो
वा त्रिलेन तु ब्राह्मणौ॥ भार्गपीचार्यौ क्षत्रियावर्कलोहितौ॥ वैश्यौ सोमबुधौ ह्येमौ शेषा
च्छूद्रान्विनिर्दिशेदिति वर्णा उक्ताः॥ स्कांदे॥ मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षि
णे॥ दक्षिणे लोहितं विद्याद्बुधं पूर्वोत्तरेण तु॥ उत्तरेण गुरुं विद्यात्पूर्वेणैव तु भार्ग
वं॥ पश्चिमे तु शनिं विद्याद्राहुं दक्षिणपश्चिमे॥ पश्चिमोत्तरतः केतुः स्थाप्या वै शुक्लतं
डुलैः॥ अथवा वर्णकैः कार्याः कार्याः स्वर्णादिधातुभिः॥ शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्या

श्रा०

॥१२।

उदङ्मुखौ॥ प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः॥ प्राङ्मुखौ ऊर्ध्वदृष्टी॥
उदङ्मुखौ वामदृष्टी॥ प्रत्यङ्मुखा वधोदृष्टी॥ आदित्याग्निमुखा इति मात्स्ये केचि
त्तिहेमाद्रिः॥ विकल्प इति युक्तं॥ वर्णरूपगुणैर्युक्ता व्याहृत्यावीतहै हयेत्तुताः॥ स्वको ग्रहमंडल
दे॥ भानुं तु मंडलाकारं सोमं तु चतुरस्रकं॥ अंगारकं त्रिकोणं तु बुधं बाणाकृतिं त
था॥ गुरुं तु पट्टिशाकारं पंचास्रं भार्गवं तथा॥ धनुस्तुल्यं शनिं विद्याद्राहुं शूर्पाकृ निं
तिं तथा॥ ध्वजाकाराः केतवः स्युर्गणेशांतस्वरूपिणः॥ तद्वर्णे मंडलेषु ता आदिप्रति
मास्तु तंडुलैः स्थापयेद्दिक्ष्वपथैः॥ मंडलमूर्त्योर्विकल्प इति हेमाद्रिः॥ अतमंत्रानाह राम
याज्ञवल्क्यः॥ आकृष्णेन इमं देवा अग्निर्मूर्धा दिवः ककुत्॥ उद्बुध्यस्वेति च ॥१२॥
ऋचा यथासंख्या प्रकीर्तिताः॥ बृहस्पते अति यदर्यस्तथैवान्नात्परिस्रुतः॥ शं
न्नो देवीस्तथा कांडा केतुं कृण्वन्निमास्तथा॥ स्वादेत्तु कयान इति राहोः केसु

क्रैं ॥ मास्येत्वन्येउक्ताः ॥ अग्निं दूतं दिनेशाय सोमापास्वग्नइत्यपि ॥ स्योना पृथिवि नौ
मापइदंविष्णुर्बुधाय च ॥ इंद्रआसांसुरेज्याय शुक्रज्योतिः सिताय च ॥ प्रजापतेति सौ
राय आयंगौरिति राहवे ॥ केतवे ब्रह्मजज्ञानं स्वैःस्वैर्मंत्रैः प्रतिष्ठिताः ॥ अन्यार्थाना
मपि मंत्राणां देवतात्वं प्रयात्यमैंद्रीस्यादिति न्यायेन विनियोगः ॥ होमेप्येत एव ॥
अधिदेवतौ स्कांदे ॥ सूर्यस्यवोत्तरेशंतुउमां सोमस्य दक्षिणे ॥ स्कांदमंगारकाद्वेव
दक्षिणे स्थानिवेशायेत ॥ सौम्यात्पश्चिमतो विष्णुं ब्रह्माजीवस्यपूर्वतः ॥ इंद्रंभृगोर्द्वसिता
द्विग्धिमंदस्याग्नेयतो यमं ॥ राहोः पूर्वोत्तरे कालं सर्वभूतक्षयावहं ॥ केतोर्निरृतिदि
ग्भागे चित्रगुप्तं निधापयेत ॥ ईश्वरं त्र्यंबकं वेति श्रीधतेति च पार्वतीं ॥ यदक्रं
देतिबुस्कंदं विष्णुं विष्णोरराटत ॥ आब्रह्मन्निति ब्रह्माणं सजोषा इंद्र वासवं ॥ य
मायत्वेति च यमं कालं कार्षिरसीति च ॥ विवावस्विति मंत्रेण चित्रगुप्तं निधापयेत ॥

श्री
॥१२॥

अग्निराप: क्षितिर्विष्णुरिंद्र ऐंद्री प्रजापति:॥ सर्पो ब्रह्मा च निर्दिष्टा अधिदेवा यथाक्र
मं॥ अग्निं दूतमिति ह्यग्ने वरुणस्य उदुत्तमं॥ स्योना पृथिवि मे॰ दिन्याइदं विष्णुस्तवि
ष्मवो इंद्रायेंद्रो इंद्रीति इंद्रस्यात्मानपाणी शची स्पतौ प्रजापते प्रजेशस्य एष ब्रह्म हेमिवा वि वे:॥
संयोनिमोस्तु सर्पेभ्य: सर्पाणां स्थापने मत:॥ गोभिलवसिष्ठौ॥ ग्रहदेवतयोर्मध्ये अ
धिदेवान्निवेशयेत्॥ मदने रत्ने संग्रहेतु: अधिदैवा दक्षिणतो वामे प्रत्यधिदेवता:॥ दै५
स्थापनीया: प्रयत्नेन व्याहृतीभि: पृथक् पृथक्॥ उत्पलपरिमाले॥ ग्रहस्य दक्षि
णपार्श्वे स्थापयेदधिदेवता॥ ग्रहस्योत्तरपार्श्वे तु न्यसेत्प्रत्यधिदेवता॥ शौन सर्सम
क:॥ क्षेत्रस्य पतिना क्षेत्रपालं तूजोत्तरे न्यसेत्॥ तूजौ कौ[illegible]:॥ ग्रहदेवाधिदेवानां ॥१२॥
नैवेद्यं कुसुमानि च॥ ग्रहवच्चासनं दानं स्थापनं चानुपूर्वश:॥ इत्युक्तं॥ वासिष्ठौ
त्वन्यथोक्तं॥ रुद्रं त्र्यंबकमं॰ चेशानरवेरुत्तरतो न्यसेत्॥ सोमस्याग्नेयदिग्भागे श्री

४ ग्राह्यांशांकें निधापयेत्। शनैः प्रक्रमतः स्थाप्योयमायलेस्यचाप्रमः। कार्यिरसीमिप ...ो७

५२

श्चतेमेनकात्मजां॥ यद्रकेंद्रेतिभौमस्य स्कंदं योग्येप्रपूजयेत्॥ विष्णुं विष्णोवदाहे
तिपक्षे सुर्वेबुधस्य च॥ गुरोर्केत्तरतः स्थाप्यो ब्रह्मा ब्रह्मेतिमंत्रतः॥ सजोषइंद्रेतिम
त्रेणशचीं शौरेः कोलंतयोत्तरे॥ चित्रगुप्तं तु केतून्मां चित्रावसुरितिनैर्ऋते॥ ग्रहदेवतयो
र्मध्ये आस्पिदेवान्निवेशयेत्॥ मास्यां विनायकं तत्राइगोंवायुमाकाशमेव चाश्वि
वाहयेद्भाहृतिस्त्रित्तयेवाश्चिकुमारकौ॥ मदनरत्नस्कांदे॥ उत्तरेशानिस्यर्ध्यांगुरोः
केतोश्च दक्षिणे॥ गणाधिपं प्रतिष्ठाप्य सर्वदेवनमस्कृतं॥ तत्रैव संग्रहोर्कुमंददिने
शानामुत्तरस्यांपथाक्रमं॥ जलेशाउगोंवायं च राहुकेत्वोश्च दक्षिणे॥ आकाशमु
श्विनौ वेतिपं वैतान्स्थापयेद्बुधः॥ वसिष्ठः॥ विनायकं गणानां त्वोइगोंवि जातवे
दसे॥ वायोयते तयावायुघृतघृतेतिंचाबरं॥ यावंकाशेति संपूज्यो द्वावप्येतौततो
श्विनौ॥ जोन्तिल्लीये। द्वात्रिंशद्देवताः स्थाप्याः दिशां पालाश्च दिग्गताः॥ याज्ञवल्क्यः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

×गुडोदनं पायसं च हविष्यं क्षीरषाष्टिकं दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च दद्याद्ग्रहक्रमादेतद्द्वि
जेभ्यो भोजनं बुधः॥ वा शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं॥ हविर्घृतोदनं चूर्णं तिलमिश्रोदनं॥ १

यथावर्णं प्रदेयानि वासांसि कुसुमानि च॥ गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः॥ ४
रक्तं दद्याद्दिवाकरकुजाभ्यां हि दापयेत् शुक्लं चंदनं॥ चंदनं भार्गवे चैव सिते च सित
वर्णं प्रदापयेत्॥ कुंकुमेन तु संयुक्तं चंदनं जीवसोम्ययोः॥ अगरुचंदनं दद्याद्राहुके
त्वर्कजेषु च॥ ग्रहवर्णानि पुष्पाणि गायत्र्या धूपमादहेत्॥ रवेः कुंदुरुकं धूपं
शशिनस्तु घृताहुताः॥ भौमे सर्जरसं चैव अगरुं च बुधे स्मृतं॥ सिल्हकं गुरवे दद्याच्छुक्रे
बिल्वागतं तथा॥ गुग्गुलुं मंदवारे तु लाक्षा राहौ च केतवे॥ उद्दीप्यस्वेति मंत्रेण दी
पं दद्यात्ततः द्विजः॥ गुडोदनं रवेर्दद्यात् सोमाय घृतपायसं॥ लोहिताय हविष्यान्नं बुधाय
क्षीरषाष्टिकं॥ दध्योदनं गुरोर्दद्यात् शुक्राय च घृतोदनं॥ मिश्रितं तिलमाषैश्चनैवे
घं तु शनैश्चरे॥ राहो मांसौदनं दद्यात् केतोश्चित्रौदनं तथा॥ मात्स्ये तु मस्तरांश्च
कुर्जे दद्यादिमुक्तं॥ निवेदयित्वाहुतिभिर्होमं कुर्याद्ततः द्विजः॥ अत्र विशेषो मत्स्य

क दो॰

स

ते दानं ममेलाकरे ज्ञेयः मास्यो धूपामोत्र सुरभिरूपरिष्कल्पितानेकं ॥ अधिदेवादीनां
त्वस्थलपरिमले ॥ सर्वेषां लोकपानां च चंदनं च विलेपनं ॥ शतपत्राणि पुष्पाणि दद्या
द्गुग्गुलुधूपकं ॥ दीपं गोघृतसंयुक्तं नैवेद्यं च घृतोदनं ॥ मास्य ॥ प्रगुणरैण तस्माद्वेद्य हेता
विभूषितं ॥ चूतपल्लवसंयुक्तं फलवस्त्रोपसुगन्धितं ॥ पंचरत्नसमायुक्तं पंचभंगयुतं तथा ॥ स्था
पयेद्धवलं कुंभं वरुणं तत्र विन्यसेत् ॥ गंगाद्याः सरितः सर्वाः समुद्रस्य सरांसि च ॥ राजा
र रथ्यावाल्मीकसंगमाद्धूदगोकुलात् ॥ मृदमानीय विप्रेंद्र सर्वौषधिसमन्वितां ॥ स्नानार्थं वि
न्यसेत्तत्र यजमानस्य धर्मवित् ॥ याज्ञवल्क्यः ॥ कर्तव्यासित्रवं तेथ्म च रवः प्रतिदैवतं ॥ नाना
श्रपयेत्समोप्यावमिववना सह पृथग्वा श्रपयेत् ॥ मात्स्ये होमसमारंभे सर्पिर्यवव्रीहितिला
दिष्टिः हेमाद्रौ देवीपुराणे ॥ गणाधिपतये देया प्रथमा तु वराहुतिः ॥ अन्यथा विफलं विप्र
नवतील न संशयः ॥ अर्कः पलाशः खदिरस्त्वपामार्गोथ पिप्पलः ॥ उदुंबरः शमी दूर्वा कु

॥२४॥

मा०

साश्च समिधः क्रमात्॥ एकैकस्य त्वष्टशतमष्टाविंशतिरेव वा। होतव्या मधुसर्पिर्भ्यां दध्ना क्षी
रेण वा युताः॥ प्रदेशमात्रः सुमिधश्चशाखा अपलाशिनीः। देवानामपि सर्वेषामुपांशु प्र
मार्थवत्। स्वेन स्वेनैव मंत्रेण होतव्याः समिधः पृथक्। होतव्यं च घृताद्यत्र चरून्दध्यादि
कं ततः॥ स्कांदे स्थापनमंत्रा एव होममंत्रा उक्ताः अधिदेवादीनां चैव॥ वासिष्ठानामपि हो
माणां स्थापने मंत्रैर्होमो व्याहृतिभिस्तिलैः। मात्स्ये च अधिदेवादीनामन्ये मंत्रा उक्ताः। आवो
राजेति रुद्रस्य बलिंमों समाचरेत्॥ आपोहिष्ठेत्युपाश्च स्योनेति स्वामिनस्तथा॥ विष्णोरि
दं विष्णुरिति चैतमीशेति स्वयंभुवः। इदमिद्वतानय इंद्राय स्युक्रयास्तु नः। तथा यमस्य
चायंगौरिति होमः प्रकीर्तितः। कालस्य ब्रह्मजज्ञानमिति मंत्रः प्रशस्यते॥ चित्रगुप्तस्य
चाज्ञानमिति वेदविदो विदुः। अग्निं दूतं वृणीमह इति वह्नेरुदाहृताः। उदुत्तमं वरुणमित्यपा
पां मंत्रः प्रकीर्तितः। नमः पृथिव्यंतरिक्षमिति वेदेषु पठ्यते। सहस्रशीर्षा पुरुष इति वि

हो०

राम।
२४॥

स्तोत्रमुदाहृतं॥ इंद्रायेंदो मरुत्वत इति शाक्रस्य शस्यते॥ उत्तानपर्णीमं मंत्र उच्यते॥ सुन्वगेग्र
तिशाव्याः प्रशस्यते॥ प्रजापते पुनर्होमः प्रजापत इति स्मृतः॥ नमोस्तु सर्पेभ्य इति सर्पाणां मं
त्र उच्यते॥ एष ब्रह्मा य ऋत्विय इति ब्रह्मण्युदाहृतः॥ विनायकस्य चाखून इति मंत्रे बुधैः स्मृ
तः॥ जातवेदसे सुनवाम दुर्गा मंत्रोयमुच्यतृतें तो॥ आदित्यप्रत्नस्य रेतस आकाशस्य उदाहृतः॥
क्षाणीविशामुर्महीनां च वापो मंत्रः प्रकीर्तितः॥ एषो उषा अपूर्व्येति अश्विनौ मंत्र उच्यते॥ स्कां
दें नैव घृतोषं ज्ञात्वा तु होममंत्रादनंतरं॥ अपव्याहृतिभिर्ज्ञात्वा एकैकस्य यथाक्रमं॥ अष्टोत्त
रं च सहस्रं शतमष्टाधिकं तथा॥ अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत्॥ नैवेद्यशेषतो
मः केषांचिच्चित्॥ हेमाद्रौ॥ ततोवदानधर्मेण स्रुचैव जुयाच्चरुं॥ घृताक्तार्कसमिद्भिश्च सर्पि
षा च तिलैः क्रमात्तत्तन्मंत्रैश्च होतव्याः क्रमात्तद्धि देवता॥ तेन चरोः प्रत्याहुत्यवदान
धर्मः॥ केचिद्धस्तेन होममाहुः॥ स्तद्विंत्यं॥ मास्यो॥ होतव्यं च स्रपि- सर्पिश्चरुश्च रूपादिकं पुनः॥

२ स्रुवेणाज्यं च हावयेत॥ आकृष्णेनेति मंत्रेण तिलान् व्याहृतिभिर्हुनेत॥ चरुणा च समिद्भिश्च २

या॰ × अत्र व्याहृतिभिरिति हेमाद्रिपत्नादे करोत्यप्राशनमग्नसाहि यत्कुलमोरुपादे पगतला सर्वव्याहृतिभिरेका ३
२५॥ हितसेन युक्तौ हेमाद्रौ भट्टनिबंधोपि चारे। हि होमो व्याहृतिभिर्भैव सर्वस्याच्च विधीयते १ भूर्भुवः स्वः सत्याया स्वाहा लै
× तदुक्तं हेमाद्रौ भट्टनिबंधे

मंत्रैर्द्वे चाज्याहुती हुत्वा होमं व्याहृतिभिस्ततः। उदङ्मुखः प्राङ्मुखो वा कुर्याद्ब्राह्मणपुंगवः।
नवग्रहादिकं नैवेद्यं घृतोक्षितं हुत्वा तत्र हुतं मंत्रैः स्रुवपुतं होमीयं तिलादिद्रव्येण प्रत्येकं दद्याद्धुतीः
हुत्वा प्राग्वदिन्द्रादिव्याहृतिभिर्व्यस्ताभिस्तिसृभिः समस्ताभिश्चैकेत्येवं मा च त्वायुतलक्ष
लैर्होमादिसंख्यापूरणीयेति हेमाद्रौ मदनरत्ने चैवं॥ एवं विनागे मूलं तु न विघ्नः। ततस्तं
हुतिस्तिस्रो व्याहृतिभिरेकाहुतिरित्येवं सर्वो होम इति प्रतिज्ञातौ। मात्स्ये। मंत्रैर्वे तस्य कर्त्तौ।
व्यास्त्रवः प्रतिदैवतं। हुत्वा चैतांश्चरून् सम्यक् कृतो होमं समाचरेत्॥ पूर्णाहुतिं च मूर्धानं
दिवस्पृशन्निपात[illegible]त अथ लिंगकोमंत्रेण वा घमंगल्यगीतकैः॥ पूर्णकुंडेन तेनैव होमांते प्राग्गुद
ङ्मुखैः॥ यजमानस्य कर्त्तव्यं चतुर्भिः स्नपनं द्विजैः। तत्र सुरास्त्वेत्यादयो मंत्राः प्रयोगे वक्ष्यते॥
अग्निपुराणे॥ मूर्द्धानं दिव मंत्रेण संस्रवेणाववधारया॥ दद्यादुस्स्वायपर्णो वैन्नोपविश्य कदाच
न॥ मत्स्यपुराणे तु मूर्धानं पुनः स्वादित्या॥ पूर्णा दर्वि सप्तते अग्नेइति पूर्णाहुतौ चत्वारो मंत्रा उक्ताः॥ न

सहोमोविधि
स्तोदितो
माद्दिक
निर्णयः
सेधान्या
विरोधाभा
[illegible]॥१०
॥२६॥
॥२५॥

विष्णोत्तरेणैन सख्यानियमश्चात्र ब्राह्मणानां नरोत्तमानकालनियमश्चैव स्वेच्छया यज्ञउच्यते ततः
शुक्लांबरधरः शुक्लमाल्यानुलेपनः। सर्वौषधैः सर्वगंधैः स्नापितो वेदपुंगवैः। यजमानः सप
त्नीकश्चर्त्विजश्च समाहितः॥ दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः। वासिष्ठ्यां। ततस्तस्यान्तिकि
त्तस्य रक्षार्थं बलिमुत्क्षिपेत्॥ दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराजयेत्ततः। प्रयोगपारिजाते वाम
नः॥ आचार्यप्रवृत्तिप्रश्नग्रहार्चनफलं ततः॥ समिदाज्यचरूणां च तिलहोमफलं तथा॥ तेषां जप
फलं तद्वद्धृ ह्लीयाञ्जलपूर्वकं॥ ततस्तेभ्यो यथाशक्ति दातव्या दक्षिणा पृथक्। ताश्चा।याज्ञवल्क्ये
नोक्ताः॥ धेनुः। शंखस्तु यानड्वान्हेम वासो हयः क्रमात्॥ कृष्णा गौरायसं छाग एता वै दक्षिणाः
क्रमात्॥ मात्स्ये। सुवर्णेन समाः कार्या यजमानेन दक्षिणाः। सर्वेषामथवा दद्याद्गुरवे वा येन तुष्यति॥ गो ३
स्वमंत्रेण प्रदातव्याः सर्वाः सर्वत्र दक्षिणाः। ते च मंत्राः मत्स्ये ते दानकमलाकरे ज्ञेयाः। अत्रा
पि प्रयोगे वक्ष्यंते॥ मदनरत्ने आश्वलायनः। एवमेकाहुतौ विप्रं होमे चन्द्रेन्न भोजयेत्॥ अत

ग्र०
॥१५॥
२६

यौमध्यमश्चापि विप्रमेकं शताहुतौ ॥ सहस्रस्य कृते वैकं जघन्योपि प्रकोजुयेत् ॥ अन्यथाह
र्तिह्रिप्रंतद्दाष्युनात्र संशयः ॥ अतो दातुमशक्तो यो दक्षिणां वान्नमेव वा जपैः प्रणामैः स्तोत्रै
स्तोषयेत्तर्पयेद्गुरून् ॥ स्कांदे ॥ यथाग्रहो द्विजस्तद्वद्विधिज्ञो वेदपारगः ॥ तोषयेन्मृदुवस्त्रा
द्यैस्तुष्टमेनं विसर्जयेत् ॥ याज्ञवल्क्यः ॥ गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं ॥ दध्योदनं ह
श्चूर्णंमांसंचित्रान्नमेव च ॥ दद्याद्ग्रहक्रमादेतां द्विजेभ्यो भोजनं बुधः ॥ शक्तितो वा यथालो
भं सत्कृत्य विधिपूर्वकं ॥ हविष्ठतेनेनः ॥ कृर्णातिलरसैर्णमिश्रमोदनः ॥ वसिष्ठः ॥ ग्रहाम्या
माहरेद्रस्मस्कचावा यस्कवेणवा ॥ चंदनं कारयेत्तेन निशिरःकंठांसवक्षुचंमा स्पशेत् ॥ एवंस
मभ्यर्च्य निष्पाद्य सर्वदेवान्विसर्जयेत् ॥ यांतु देवगणाः सर्वे पूजामादाय पार्थिवात् ॥ इष्टका
मप्रसिध्यर्थं पुनरागमनाय च ॥ अनेन विधिना यस्तु ग्रहपूजां समाचरेत् ॥ सर्वान्कामा
नवाप्नोति प्रेत्य स्वर्गे महीयते ॥ यस्तु पीडाकरो स्तंतमल्पवित्तस्य वा ग्रहः ॥ तं तु यत्नेन संपूज्य

मे

वि

॥ सा

ग्रम०॥
॥१५॥
॥२६॥

अथ प्रयोगः॥ तत्र यजमानानुकूले प्रशस्तदिवसे ऽप्योतिर्विदुपदिष्टे शुभे लग्नादौ कार्यो ऽलुमे

लग्नालाभे यजमानानुकूले शुभे मुहूर्ते वा यजमानानुकूलयाऽन्यो वा कर्त्तव्यं वा यजमानः

सुस्नातः सुप्रक्षालितपाणिपादः स्वाचान्तः शुचौ देशे प्राङ्मुख उदङ्मुखो वोपवि-

श्य कृतपाणिः अद्येत्यादि प्रकारेण देशकालौ संकीर्त्य श्रीकाम आयुःकाम आरो-

ग्यकामः पुष्टिकामो वृष्टिकामो ग्रहपीडायामनुत्पातादौ च शान्तिकामः शत्रुपराजे-

यकामो वा अयुतहोमात्मकेन नवग्रहमखेनाहं यक्ष्ये। केवलेनायुतग्रहयज्ञं करिष्ये इति वा

संकल्प्य ब्राह्मणद्वारा क्रियमाणे ब्राह्मणद्वारा अयुतहोमात्मकं नवग्रहमखेनाहं यक्ष्ये।

तत्रादौ निर्विघ्नेन समाप्त्यर्थं गणेशपूजनं पुण्याहवाचनं मातृपूजापूर्वकमाभ्युदयिकं

श्राद्धं विधाय पुष्पवस्त्रादिभिर्ब्राह्मणान्संपूज्य पुण्याहं वाचयेत्। पुण्याहवाचनप्रका-

रश्च दानोद्योते निरूपितः। आचार्यं वृत्वा ततः अमुकं ब्राह्मणं त्वद्वेदविदो गुणमुका गोत्रा यच

न्चत्विजो वृणुयात्। अथवा ब्राह्मणेव आचार्यो ब्रह्मा च वरीतव्यः। तत्रायं वरणप्रकारः। अयुतहो

नाहं यक्ष्ये तच्च मे समाचार्यो भव इति प्रार्थ्य स्वान। इति तेनोक्ते अमुकगोत्रं अमुकवेदामुकशाखाध्यायि
मुकशर्माणं ब्राह्मणमेभिर्गंधनाक्षतपुष्पतांबूलैर्वासोलंकारैस्त्वामहं वृणे इति वृत्वा ततोस्मै तिते
लेखनमेवेतरान् ऋत्विजो वृत्वा वरणक्रमेण तेषां तच्छास्त्रे पाद्यमधुपर्कः अर्हणीयशास्त्रानुसारेण म
धुपर्केणार्चयेत्। मधुपर्कविधिर्विधिर्दानोद्योते निरूपितः। ततो यजमानः गृहस्येशानभागे रुद्रायत
ने वा प्रागुदक्प्रवणायां भूमौ तथा कारितायां वा दशहस्तामष्टहस्तां वा मंडपं चतुर्द्वारं कूटं वा कृत्वा
तस्य मध्ये हस्तपरिमितस्थानविस्तारं समचतुरस्रं लक्षणान्वितं कुंडं कुर्यात्। तत्रैकमेखलो योन्यायचिता
माभ्यां चतुरंगुलप्रमाणगुदक्प्रवणा सर्वतः समा कार्या। योनिस्तु द्वादशांगुलादीर्घा षड्भिः सप्तभिर्वांगुलै
र्विस्तृता कूर्मपृष्ठोन्नता मध्यांगुलोच्छ्रितप्रांता गतोष्ठसदृशी छिद्रयुक्तसंयुता मेखलाया उपरि पश्चि
मभागे प्रागग्रा स्थापनीया। अन्यः सर्वोपि कुंडमंडपादिविचारो दानोद्योते निरूपितः। मंडपस्यैशा
नभागे कुंडं कार्यमित्युक्तं हेमाद्रौ। ततः कुंडस्येशानभागे ग्रहादिदेवस्थापनायोपरितनभागो हस्त
विस्तृता वितस्त्युच्छ्राया वप्रद्वयवता च चतुरस्रा उदक्प्रवणा वेदिः कार्या। प्रथमो वप्रो द्व्यंगुलउच्चः
द्वितीयस्त्र्यंगुलोच्छ्रायो द्वावपि द्व्यंगुलविस्तारौ कार्यौ।

१ हेमाद्रौ निष्याभिजः। संकल्पमधुपर्काणामासितः कर्म कारयेत्। अन्यथा निष्फलं कर्म भवतीह न संशयः ति॰
ार्घ्य शाखया कार्यः। अर्घ्यं शाखया मधुपर्कः इति तत्रैव स्मृतेः।

ग्रोषानप्यर्चयेन्नरः। तथा। सदैवायुतहोमोयं नवग्रहमखः स्मृतः। विवाहोत्सवयज्ञेषु प्र-
तिष्ठादिषु कर्मसु॥ निर्विघ्नार्थं मुनिश्रेष्ठ तथोद्वेगाद्भुतेषु च॥ वश्यकर्माभिचारादि तथै-
वोच्चाटनादिकं। नवग्रहमखं कृत्वा ततः कर्म समारभेत्॥ अन्यथा फलदं पुंसां न काम्यं जा-
यते क्वचित्॥ अद्भुतं तूक्तंपादि। अन्यश्चात्र विशेषः पितृकृतप्रयोगदीपिकायां ज्ञेयः। पञ्चु
शिष्टाः ग्रहमंत्राणामयुतसहस्रादिसंख्यया जपं कृत्वा तद्दशांशेन तिलैर्होमं कुर्वन्ति
तत्र कुत्रापि जपानुक्तेः किंमूलकमिति न विद्मः॥ इत्ययुतहोमविधिः॥ अथ प्रयोगः॥ सचय अत्रत्रोधपद्धे
घप्यस्त्यपितामहकृतोस्तौ वा तथापि संक्षेपेणोच्यते॥ कर्त्ता देशकालौ स्मृत्वा श्रीकामः यतदी
डयामृत्युत्पातिरोगे वा तच्छांतिकामः शत्रुपराजयकामो वायुतहोमात्मकनवग्रहयज्ञेनाहं यक्ष्ये॥
केवलं तु ग्रहयज्ञं करिष्ये इति वा संकल्प्य गणेशं संपूज्य मातृपूजां वृद्धिश्राद्धं च कृत्वा आचा-
र्यं वृत्वा ऋत्विजश्चतुरः चात्विजो वा एकं यथालयं वा आचार्यो ब्रह्मा चेति द्वौ। तेषां तच्छाखया मधुपर्कैः॰त

ार्ययेत्। तन्नो गतिः पितामाता त्वं गतिस्त्वं परायणम्। तस्मात् देनानिप्रवेस वेमेस्मान्मनोगतो आनन्दमोक्षाय च
कुरु यत्हमानं दृतः। कोऽपि होमारम्भमधुकं शांत्यर्थं मार्कण्डेमिकं मितितंतेः ९

१०
॥कृतौ॥

×अथाचार्यः कुंडस्य समीपे प्राङ्मुख उपविश्य त्रिभिर्दर्भैः कुंडम् मौंजिः परिसमूह्य नादि संस्कारं कलो

मध्ये हस्तमात्रे कुंडे कुर्यात् ऐशाने ×यस्य गृह्यस्य यद्रूपं तद्रूपैः स्तत्क्रमैस्तागाह्यपेतो आ

उभिति हस्तमात्रं तदृशा स्थां वेदी हस्तमितम् १

तोदशहस्तमष्टहस्तं वा मंडपं कृत्वा वा लक्षणौ तावितस्त्युच्छ्राय प्रद्धयसुता चतुरस्रा कार्या॥ आ
घवप्रोच्चांगुलोच्चः॥ द्वितीयस्तु अंगुलोच्चः॥ द्वावपि चांगुलविस्तारौ तत आचार्यापदत्तसंनेता अत्रगोत्रस्यं २
स्थितमिति सर्षपान्विकीर्य पापोहिष्ठा शुचीवो कृव्यमिति पंचवाक्येन कुशोदकेनाप्युक्ष्य स्वस्त गर
यनं तावदर्थमि संगद्धयं पठेत॥ मूलं त्वस्मत्कृत प्रयोगदीपिकायां ज्ञेयं॥ अथ मंडपप्रतिष्ठा
त्रैलोक्ये यानि भूतानीत्यं तामन्त्रे दानकमलाकरे तथा॥ सा च मंडपालावेन कार्या॥ द्वा
रलोपालु॥ कृटमंडपे तु कार्या॥ विंशद्व हस्तप्रमाणेन मंडपं कृटमेनवैतिलैंगे विकल्पोक्तमा
व श्रीहिपबकेसमाननिधान त्वादित्य न्यत्र विस्तरः॥ तत कुंडसंस्कारोर्ध्वमेखलायां ब्र
ह्माणं मध्यमेखलायां विष्णुमधोमेखलायां रुद्रं पेन्मौंजौ रीचस्य कूप्याग्निं खगहोत्र ॥राम० ॥कृतौ॥
विधिना प्रतिष्ठाप्य ग्रहवेधो ग्रहा स्थापयेत्॥ पश्चात् ग्रहवेद्यां वस्त्रे श्वेतं पमंगपा
वै१ दिना कृत्वा मध्ये कर्णिकायां वर्तुलं मंडलमस्तौ तंडुलपुंजेषु ब्रह्मादिकेन हिरण्यस्थपः सवितारि ण्प५

ततो गोमयेन त्रिहल्लेपनं कृत्वा खादिरेण स्फ्येन स्रुवेण प्रागग्रगुदक्संस्थं रेखात्रयं कुर्यात्ततो रेखाभ्यो पांशुमनामिका
ङ्गुष्ठाभ्यां क्रमेण पांसुमुद्धृत्य त्रिरुदकेनाभ्युक्ष्य तत्राग्निं स्थापयेत् एवं स्थं गत्वा योक्त प्रकारेणाग्निं स्थापयित्वा तत उल्मी
ग्रहवेद्यामादित्यादीन्स्थापयेत्॥३

इमंदेवेतिमंत्रेणवा४ वाणाकारे६

ष्टुप्समंत्रोंते ॐ भूर्भुवः स्वः कलिंगदेशोद्भवकाश्यपगोत्ररक्तवर्णसूर्येहागच्छेहतिष्ठेति। इ१
अग्निंदूतमितिसूर्यस्थापनमितिमदनरत्ने॥ व्याहृतिभिरावाह्यमंत्रेणस्थापनमिति
तत्रैव। एवमग्रेपि। तत्र आग्नेयदले चतुरस्रे आप्यायस्वगौतमः सोमोगायत्री अनेनवा
प्स्वग्नेइतिवा ॐ भूर्भुवः स्वः यमुनातीरोद्भवात्रेयगोत्रशुक्लवर्णसोमेहेत्यादि। दक्षिणेद
ले त्रिकोणे अग्निर्मूर्धाविरूपोंगारकोगायत्री अनेनस्योनापृथिवीतिवा भूर्भुवः स्वर
वंतीभूसमुद्भवभारद्वाजगोत्ररक्तवर्णभौमेहेत्यादि। ऐशान्ये उद्बुध्यध्वं बुधः सौम्यो बुध हेर
स्त्रिष्टुप् अनेनेदंविष्णुरितिवा ॐ भूर्भुवः स्वर्मगधदेशोद्भवात्रेयगोत्रपीतवर्णबुधे
हेत्यादि। उत्तरे दीर्घचतुरस्रे बृहस्पतेद्गृत्समदो बृहस्पतिस्त्रिष्टुप्॥ अनेनेंद्र आसामिति
वा ॐ भूर्भुवः स्वः सिंधुदेशोद्भवांगिरसगोत्रपीतवर्णबृहस्पतेइहेत्यादि। पूर्वदले पंच
कोणे अन्नात्परिस्रुतइति कं वा शुक्रज्योति। नरितिवा ॐ भूर्भुवः स्वः भोजकटदेशोद्भ

शु०
।२८५

क्षाममग्निरितिमंत्रेणवा २ दिशा दपुरोसन्नराळी नपुरोसन्न

वनार्जवगोत्राशुक्लवर्णकंसुत्रे हेत्यादि। केविलसुत्रेक्रः शुशुक्रानि स्पर्धचं शुक्रमुंत्र
माकुस्याघित्वं। पश्चिमे धनुर्षकारेशान्नोदेवीः सिंधुद्वीपः शनिर्गायत्री अनेनप्रजापते
न त्वदितिवाॐ भूर्भुवः स्वः सौराष्ट्रदे[illegible]शोद्भव काश्यपगोत्र कृष्णवर्णशनैश्चरे
हेत्यादि॥ नैर्ऋत्ये सूर्पाकारे रा[illegible]पैठीनसिगोत्र[illegible]वर्णराहोइ कयानोवामदेवो
राकुर्णगायत्री। अनेनकांडात्कांडादिति वायं गौरिति वाॐ भूर्भुवः स्वः राठीनापुरोद्भव पैठी
नसीगोत्रकृष्णवर्णराहो इहेत्यादि वायव्ये ध्वजाकारे केतुं मधुच्छंदाः केतवोगायत्री
अनेन ब्रह्मज्ञानमिति वाॐ भूर्भुवः स्वरंतर्वेदिसमुद्भव जैमिनिगोत्र चित्रवर्णके
तोहैइत्यादि॥ अथाधिदेवाः॥ सूर्योत्तरे त्र्यंबकमिति रुद्रं। सोमदक्षिणे श्रीश्चते इत्युमां॥
भौमदक्षिणे यदक्रंदेतितिस्कंदं॥ बुधपूर्वे विष्णोरराटमिति विष्णुं। गुरोरुत्तरे आब्र
ह्मन्निति ब्रह्माणं। शुक्रपूर्वे सजोषा इंद्र इतीन्द्रं॥ शनेरग्नेयेयमायत्वेति यमं। राहोरीशा
ने कार्षिरसीति चित्रगुप्तं॥ अथ प्रत्यधिदेवाः। ते वायव्ये दक्षिणे उत्तरेवा। अग्निंदूतं। अग्निं

ॐ५
राम.
॥२८॥

विष्णुं।

अत्रत्रोभपत्रं ८

अ
अप्स्वग्नेऽपः स्योना पृथिवि भूमिः इदं विष्णुः॥ इड आसां इदं अदित्यै रास्नासि। इन्द्राणी॥
प्रजापते प्रजापतिं। नमोस्तु सर्पेभ्यः सर्पान्॥ ब्रह्मजज्ञानं॥ ब्रह्माणं स्थापयेत्॥ ततोर
वेरुन्तरे गणानां त्वेति गणेशं ईशाने रुद्रं रे जातवेदस इति दुर्गां स्तर्यो चरे वायो येते इति वा
पुंसाहो ईशाने घृतं घृतपावान इत्या काशं केतोर्दक्षिणे पावांकेशो त्यग्निनो स्थापयेत्॥
ततो दिक्षु त्रातारं। अग्निर्दूतं यमाय त्वा। असुन्वंतं त्वावायामि। वायोयते वयं सोम।
तमीशानं। ब्रह्मयज्ञानं। नमोस्तु सर्पेभ्य इति दशदिक्पालानावाहयेत्॥ अत्रमंत्रा
णां वा चलिकत्वेपि स्वशाखीयैस्तु मंत्रैर्वा लोकेशान्व्याप्तु समंततं इति हेमाद्रि। वाहनादि
कार्यं। संहितायां तु ये मंत्रास्तु दैवस्याः श्रुतास्तु ताः तैः पूजा लोकपालानां कर्तव्या तु समंतत
त इति हेमाद्रिः गारुडस्योपलक्षणार्थत्वादिति केचित् ततो वेघा ऐशान्यां मही द्यौरिति भू
मिं स्पृष्ट्वा ओषधयः समिति यवान्निक्षिप्य कलशं स्थापयेति कुंभं निधाय ममे गङ्गेइति। ती

स्या ३

अनंतं ५

पूर्वेशानयोर्मध्ये ५   मितिब्रह्माणं। पश्चिमनैर्ऋतयोर्मध्ये ५

श्री॰
॥२५॥

आ॰स्थानात्पृथिवी त्वश्वगजास्थानवल्मीकसंगमह्रदगोकुलराजद्वारेभ्यः सप्तमृत्तिकाः। याः फलिनीतिफल
३ हिरनीतिपंचरत्नानि हिरण्यरूप इति हिरण्यं चांदि प्वा प्रवालं वा सा[illegible]ति ३।

र्यजलेनापूर्य तत्र गंधद्वारामितिगंधं या ओषधीरिति सर्वौषधी दधिक्राव्णो इति दधी आ
प्यायस्व समित्स्मसेवातक कांडात्कांडादिति दूर्वाः अश्वत्थे वो इति पूतान्वत्थ्योदुंबरप्ल
क्षपल्लवाँ।स्या इति वस्त्रपुष्पेनावेष्ट्य पूर्णा दर्वीति पूर्णपात्रं निधाय यावते हे लोवरु
णेति वरुणमावाह्य सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥ आयांतु यजमान
स्य दुरितक्षयकारकाः इति तीर्थान्यावाह्य सर्वेषां प्रणवादिनमोंतनाममंत्रैरुक्तैत
दर्ले वस्त्र गंध पुष्प धूप दीपोक्तनैवेद्य फलं तांबूलदक्षिणा नमस्कारैश्च पूजां
कुर्यात्॥ उपरि फलपुष्पांयुतं वा देइत्माधैः कुंचं॥ संप्राप्य कुंडेन्वाधानादिप्रत्येकं
निर्वा[illegible]दि प्रोक्षणादिना समोपेक चन्निन्नान्वाचरूं चैश्रपयित्वाज्य नागांतेमजमासं॥ नः
द्व्याणि तत्र देवता उद्दिश्य उत्सृज्ये न मम यथा देवत नमस्त इति त्यजेत्॥ ततो ग्रहाणा
मुक्तसमिधः प्रादेशमात्राम धुद्घृत दधियुतास्तत्तन्मंत्रैः प्रत्येकमष्टोत्तरशतमष्टा
× विंशतिं वा दद्यात्। एवमाहोमसमाप्तिप्रतिदिनं कुर्यात्। ततः कलशस्य मुखे देवदानवसं ४

ग्रहादीनां प
रामः
॥२५॥

भूर्भुवः स्वः स्वाहेत्येवं सर्वो होमः। भूर्भुवः स्व स्वाहेति होमः सर्वो दिप्रायमो इति हेमाद्रौ सर्वप्रयोगपारिजाते स्मृति
वांने भिन्नः।६ स्वाहा

वरेः १

विंशतिं वाहुत्वाधिदेवाप्रत्यधिदेवविनायकादिपंचकलोकपालेभ्य उक्तसंख्यैर्न्यूनं संख्य
याष्टौ चतस्रो वाहुत्वा तत्तन्मंत्रैरेकैकामाज्याहुतिं हुत्वोपस्तरणादिना प्रत्येकं तन्मंत्रैः। नर
तर स्तु चावदाहुतिमेकैकां जुहुयात् ततः स्विष्टकृतं हुत्वा व्रीहिमयचरुघृतयुतेस्ति द्रव्ये पाकोमस्तुप
कल्पितद्रव्येणाग्रहेभ्यस्तन्मंत्रैः इत्यादराहुतीर्हुत्वा भूरादिव्याहृतिभिर्व्यस्ताभिः समस्ता
भिश्चैकैकमेवमयुतं संख्यो होमः कार्यः। अयुतलक्षहोमादिसमाप्ते स्विष्टकृन्नास्य वा प्रा
यश्चित्ताहुतिपूर्णाहुत्याद्येव कार्यमिति हेमाद्रिमदनरत्नादयः॥ तन्न॥ अयुतहोमादा
तस्य ४ वतिदेशप्राप्तस्य बाधे नाच्चावात्तएतच्च शेषस्यार्थत्वात् अयुतेपि तत्त्वापत्तेः॥
अन्ये त्वेतद्दिन एव स्विष्टकृत्। अन्यथा सुत्योत्कर्षे सवनीयपशुयागादौ का गतिः। शेष
स्थापनार्थं वाज्यहोमादिरूपा प्राप्य आस्थेयः। इति वदंति। वयं तु स्विष्टकृत्प्रागद्वयं कार्यं। स्वि
ष्टकृद्यागोत्तमानुत्वे [illegible]स्य प्रयोजकः। प्रतिपत्तिकृत्याप्युपजीवित्वात् शेषस्कृतस्य प्रयो
x अन्ये त्वेवं स दिविनायकादिभ्यः।६

तस्थापनस्य च १

कुं

॥२६॥

जकएव॥ संस्कार्यत्वात्॥ अन्यथायांयपशुपुरोडाशादावपि पृथक्स्विष्टकृदिंनस्या
त्॥ होमाद्यादिलिखनाद्वैवमान्नाति॥ एकबर्हिरिध्माज्यस्विष्टकृतः स्रुक्स्त्यकाह्ला इत्या
श्वलायनोक्तेः कात्यैकाये एकः कौत्सेवेदनुनीनेनिर्युक्तमुत्यद्यपामः॥ ततः स्रुवेस्रुकृतेनहोमं स
माप्यस्विष्टकृदादिप्रायश्चित्ताहोमांतं स्वशाखीयं प्रणीताविमोकाग्रावूरूत्यादिवु
कं पालेन्यो गृहेन्थः विनायकादिन्यः क्षेत्रपालाय च बलीन्दत्वा स्वविधानाद्वसार्थहोमंतं
गृहीत्वोर्ध्वस्तिष्ठन्सुपर्णेनं नारद्वाजो वैश्वान~~रायेदं न ममेति त्यागः ततः प्रणीता~~ सि
ष्टयं॥ अनेनपुनस्त्वापूर्णादर्वि॥ सप्तते इति च चतुर्थिवा पूर्णाहुतिं कृत्वाग्नये वैश्वानरायेदं
नममेतित्यागः॥ ततः प्रणीताविमोकादिब्रह्मविसर्जनांतं कर्म समापयेत्॥ ततः सर्वौषधैः
सर्वगंधैश्च प्राशुक्लैर्विलिप्तांगं यजमानं सपरिवारं चत्वारो विप्रा ग्रहवेदेकुंभोदकेन समुद्र
ज्येष्ठत्याद्यैर्मन्त्रैरभिषिंचेयुः॥ पौराणैश्च॥ तेच॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो
जगन्नाथस्तथा संकर्षणो विभुः॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलो

॥रामच
न्द्र॥

म२

ग्निर्न्द्रेजवान्यमोवैनिर्ऋतिस्तथा।वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः।ब्रह्मणा
सहिताःसर्वेदिक्पालाःपांतुतेसदा॥कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः।बु
द्धिर्लज्जावपुःशांतिःकांतिस्तुष्टिश्चमातरः॥एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः।आ
दित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः।ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः।देव
दानवगंधर्वयक्षराक्षसपन्नगाःऋषयोमनवोगावोदेवमातरएवच।देवपत्न्योद्रुमान
पं गादैत्याश्चाप्सरसांगणाः॥अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच॥~~देवपत्न्योद्रुमा~~
औषधानिचरत्नानिकालस्यावयवाश्चये।सरितःसागराःशैलास्तीर्थानिजल
लौस्तीदानदाः।एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धयेइति॥ततःप्राङ्मुखःकर्त्ताग्नेः
पश्चादाचार्यर्त्विजःउदङ्मुखावासंपूज्यदेशकालौसंकीर्त्यकृतैतदद्भुतहोमाख्यग्रह
यज्ञप्रतिष्ठार्थंसूर्यप्रीत्यर्थमिमांकपिलांरुद्रदेवताममुकगोत्रेभ्योमुकर्त्विग्भ्योदक्षिणां

महंस्रंप्रदद्देनममेसुस्का·कपिलेसर्वदेवानांपूजनीयासिरोहिणीतीर्थदेवमयीयस्मा
दतःशांतिंप्रयच्छमेइतिपठेत्॥एवमग्रेज्ञेयं॥पुण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलं॥
विष्णुनाविधृतोनित्यमतःपाहिसनातनेति·भौमायवृषंहिरण्यगर्भं·शांतिं·इतिसो
मायशंखं॥धर्मस्त्वंवृषरूपेणजगदानंदकारकः॥अष्टमूर्तेरधिष्ठानमतःपाहिस
नातनेति·भौमायवृषं॥हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॥अनंतपुण्यफल
दमतः।शांतिं·इतिबुधायहेमं॥पीतवस्त्रयुगंयस्माद्वासुदेवस्यवल्लभं॥प्रदानात्तस्यमे
विष्णुरतःशांतिं·इतिगुरवेपीतवस्त्रं॥विष्णुस्त्वमश्वरूपेणयस्मादमृतसंभवः॥ ॥श्री॥
चंद्रार्कवाहनंनित्यमतः॥मेइतिशुक्रायाश्वं॥यस्मात्त्वंपृथिवीसर्वाधेनुःकेशवस
न्निभा॥सर्वपापहरानित्यमतः०इतिशनयेकृष्णांगां॥यस्मादायसकर्माणित्वदधी
नीनिसर्वदा॥लांगलाद्यायुधादीनितस्माच्छांतिं·इतिराहवेलोहं॥यस्मात्त्वंछागयज्ञाना

वस्त्रकांचनरत्नौ ~~[illegible]~~ ८

तीवस्य ४

मंगल्ये न व्यवस्थिताः॥ यानं विन्नाव सो निर्यमतः॰ इति केतुच्यस्छागं॥ सर्वेषां चा
गावाः॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके पर
त्र चेति देयाः॥ सर्वेभ्यो वा सुवर्णं॥ सर्वपदेषु शय्यारत्नानि भूमिश्चाधिका इति॥ तन्मंत्रा
स्तु॥ यस्मात्स्मरशून्यं शयनं केशवस्य च॥ शय्या ममाप्यशून्यास्तु दत्ता जन्मनि जन्मनि॥ यथा
सर्वेषु रत्नेषु सर्वेषु स्व वैद्वैवाः प्रतिष्ठिताः॥ तथा शांतिं प्रयच्छंतु रत्नदानेन मे सुराः॥ यथा
भूमिप्रदानस्य कलां नार्हंति षोडशीं॥ दानान्यन्यानि मे शांतिर्भूमिदानाद्भवत्वितेतौ
वस्त्रकांचनरत्नौन्यपि यथाश्राद्धं दद्यात्॥ ततोग्रहाणामुत्तरपूजां कृत्वा पांतु देवगणा
इति विसृज्याग्निं संपूज्य विधिवत्त्वागच्छ गच्छ सुरश्रेष्ठेति विसृज्योक्तसंख्यया विप्रा
न्संभोज्य कर्मेश्वरार्पणं कुर्यादिति॥ ॥ इति नारायणभट्टसूनुरामकृष्णभट्टात्मजकमला
करभट्टकृतौ लक्षयुतहोमः॥ ॥अथ लक्षहोमः॥ मात्स्ये॥ कथितोयुतहोमोयं लक्षहोममतः शृ
णु॥ सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः॥ अस्माद्दशगुणः प्रोक्तो लक्षहोमः स्वयंभुवा॥ अ

ली

सन्नमि ४

भ धौः।

श्री०
।स्स॥

कृतीभिः प्रयत्नेन दक्षिणाग्निस्तथैव च॥ द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं तथा॥ स
शालो मेखलावेष्टं दैर्घ्यो निम्नश्च त्रिमेखलं॥ चतुर्हस्तायतमिति प्रहीतरं चिरदाहियवाद्दिवि
षयं॥ अन्ये तु क्षेत्रफलोक्तिरियं॥ द्विहस्तकरणं पालि चतुर्हस्तं क्षेत्रं भवति॥ तेनैक एव पक्षे
इत्याहुः॥ अत्र ऋत्विजो बहुपुराणारैणा स्तोः॥ भुम्या स्तक्रौ त्विजः॥ कार्या ब्राह्मणाये वि
पश्चितः॥ नित्यं जपपराश्चैव नियोज्यास्ते द्विजाः॥ कंदमूलफलाहारा दधिपिदी
रात्रिनोपि वा मासस्ये॥ द्विरंगुलोच्छ्रिता कार्या प्रथमा मेखला बुधैः॥ द्विरंगुलोन्नता तत्र
द्वितीया समुदाहृता॥ उच्छ्रायविस्तराभ्यां च तृतीया च चतुरंगुलस्तविस्तारः पूर्वयोस्त
पि शास्यते॥ तस्य चोत्तरपूर्वेण वितस्तित्रयसंमितं॥ प्रागुदक्प्रवणं तद्वच्चतुरस्रं स
मंततः॥ विष्कंभार्थोच्छ्रितं प्रोक्तं स्थंडिलं विश्वकर्मणा॥ अष्टादशांगुलोच्छ्रमित्यर्थः॥
स्व स्थापनाय देवानां वेदित्रयसमावृतं॥ द्विरंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः॥ अं
गुलोच्छ्रायकं वप्रद्वयमायोपरि। द्व्यंगुलस्तत्र विस्तारः सर्वेषां कथितो बुधैः। द्व्यंगुलो

चतुरंगुला।

रामः।
॥स्स॥

प्रोक्तं

आदित्साभिमुखाः सर्वे माधिप सुधि देवता, स्थापनीयाः प्रयत्नेन मांतरेण पराङ्मुखाः। ग्रहम
ध्ये गरुत्सदा दिवि देवानस्थाप्याद् गिहे माद्रि ः१७ नदत्सम मण्णांभोरकेस्येरसम स्यापूर्वी ८

छितान्विनिः सौं स्थं उल्लेस्यात्तथोपरि। तदस्मिन्नावाह्य देवान्सर्ववद्धु कतंतुलैः। गरुत्मा
नमपि विकस्तत्र संस्थाप्य त्रियमिच्छता। सच सर्वा तवेघ्रा पूर्वेद्भागे स्थापः। अंते तु बाद
रायणं इति न्यायात्॥ तदा वाहनेमंत्रः। सामनिः शेषदेहस्वं वाहनं परमेष्ठिनः॥ वि
षपापहरो नित्यमतः शांतिं प्रयच्छमे॥ विषापहरण इति वा पाठः॥ पूर्वेव त्तुंलमासंस्थत
द्वहोमं समाचरेत्॥ सहस्रा आणांशा वंकृत्वा समि संख्यादि वृक्षं पुनः पूर्वेव समिदाज्य
रूपेत्वा सुपर्णोसि गरुत्मानिति गरुडहोमं कृत्वौ व्याहृतिभिर्व्यस्तहोमं कुर्यादितिः पदं॥ घृत
कुंभवसोर्धारां पातयेदनलोपरि॥ घृतधारां ततः सास्वग्नेरुपरि पातयेत्॥ श्रावयेत्सूक्तं
माग्नेयं वैसवं रौद्रमैंद्रवं॥ औदुंबरीमथाद्रों वंचनकी कोटरवर्जितां॥ बाउमाचां स्रुवं व
चा ततास्तुंलहघायापरि घृतधारां ततः साम्य गग्नेरुपरिपातयेत्॥ श्रावयेत्सूक्तमाग्नेयं वै
×जनगणीकरकमलध्धतेष्टा भाति सुग्मांकुजाचामलि मुकुटविचित्रालंकृता कल्पद्राकैर्भरतुभुननभातां॰

वर्णायैकरतलकरपृष्ठाभ्यां॰॥एवंषडंगः ध्यानं॥अरुणकमलसंस्थातद्रजःपुंतंतंश्रीःश्रि
येनः॥चतुर्भुजेषूर्ध्वजेषूर्ध्वयोः॥पद्मे॥अधोवराभये॥ततःषट्कोणगर्भमष्टदलं कृत्वा आ
आधारशक्त्यै॰मूलप्रकृत्यै॰मंडूकाय॰कूर्माय॰अनंताय॰महावराहाय॰भूम्यै॰ह्रीं ह्रीं रो
र्णावाये॰रत्नमंडपाय॰रत्नसिंहासनाय॰मूलप्रकृत्यै॰~~तंतमसे॰रंरजसे॰सं~~ ततःपीठे नोद्दी
य॰धर्माय॰वैराग्याय॰ऐश्वर्याय॰पूर्वादि अधर्माय॰अज्ञानाय॰अवैराग्याय॰अनैश्वर्या
य॰तंतमसे॰रंरजसे॰संसत्वाय॰मांमायायै॰विंविद्यायै॰आंआत्मने॰परमात्मने॰ज्ञानात्म
ने॰वह्निमंडलाय॰सूर्यमंडल॰सोममंडल॰विभूत्यै॰उन्नत्यै॰सन्नत्यै॰कीर्त्यै॰संतान्यै॰
बुध्यै॰उत्कर्षिण्यै॰श्रध्यै इत्यर्षु॥ततः॥मध्ये तिरत्यवर्णामित्वावाह्याग्नीशासुरवायव्य
रःपृष्ठषुहृदयादीनि॥प्रागादिदिक्षु वासुदेवाय संकर्षणाय॰प्रद्युम्नाय अनिरुद्धाय॰पुनः
पूर्वादि॥मदनकायसंनामाय॰गुदेसुगुलेलाय॥कुरंरकाय॰शंखनिधये दक्षिणे॥पद्म

८८७

ग्मायै॰ आर्द्रपद्मायै॰ तर्पयंत्यै॰ तृप्यै॰ ज्वलंत्यै॰ स्वर्णा ३

सुभ्यै॰ ज्याद्रीपद्मायै॰ तर्पयंत्यै॰ तृप्यै॰ ज्वलंत्यै॰ स्वर्णप्रागारायै॰ निधुये वामे॥ ततो व
ल्गाकै॰ विमलायै॰ वनमालिकायै॰ विलिष्टकै॰ मालिकायै॰ शाकंभर्यै वसुमालिकाय
यै॰ इत्यष्टदलेषु॥ केचित्तु हिरंगाययै॰ चंद्रायै॰ पत्नवर्णायै॰ पद्मस्थायै॰ हिरण्यवर्णा
यै॰ इतिषड्दलेष्वाग्नेयादि॥ तद्बहिरष्टदलेषु पद्मायै॰ पद्मवर्णायै॰ पद्मस्थायै॰ ज्याद्रीप
द्मायै॰ तर्पयंत्यै॰ तृप्यै॰ ज्वलंत्यै॰ स्वर्णप्रागारायै॰ ततो लोकपालैस्तदायुधानि च॥ तत
स्तां मआवाहेत्यासनं॥ अश्वपूर्वामित्यर्घ्यं॥ कांस्योस्मितां पाद्यं॥ चंद्रां प्रभासामाचमनीयं
मधुपर्कं स्नान भूषणं च॥ मनसः कामं गंधं॥ कर्दमेन पुष्पं॥ पद्मवर्णायै॰ पद्मस्थायै॰ आ
र्द्रायै तर्पयंत्यै तृप्तायै प्रज्वलिन्यै स्वर्णप्राकारायै॰ पुनर्लोकपालास्तदस्त्राणि चद्विंतुष्टिं॰ च
नेश्वरीं पुष्टां योगिनी योगिनां धात्रीमिष्टि॥ ~~इतिमं च को सो मी स्त तो विधि~~॥ आप
स्रज्यतु धूपं॥ आर्द्रां पुष्करिणीं दीपं॥ आर्द्रां पुष्करिणीं नैवेद्यं॥ तयैव क्षौचवाद्यतिरेका॥

श्री॰
॥१९४॥

तांमआवाहेतिफलंतांबूलंदक्षिणांनीराजनंपुष्पांजलिंप्रततः पंचदशर्ग्भिराज्यंजु
त्वातांमआवाहयेत्युद्वासनंच॥एवंशुक्लप्रतिपदाद्येकादशीपर्यंतद्वादशसहस्रंज
प्त्वाद्वादशांशंघृतमधुशर्करेतित्रिमधुराक्तैः पद्मैर्बिल्वसमिद्भिःपायसेनघृतेनत्रि
शतमेकैकेनहोमः॥द्वादशविप्रभोजनं॥एवंमंत्रःसिद्धोभवति॥परिसिंचेद्धि
रोनित्यसुक्तैस्तैःस्नानकर्मणि॥आदित्याभिखोजप्ये द्वावत्तावत्तर्पयेत्॥चत्वारिं
शद्गुरुवारेषुअंत्यामृचमष्टोत्तरशतंजपित्वानवनीताक्तपद्मानितत्संख्ययैवजु
हुयात्॥कांसोस्मितामितिवादशाहुतीर्घृताक्तान्नेनजुहुयान्नित्यं॥एवंषाण्मासान्॥ राम॰ ॥१९४॥
प्रत्ययहतर्पणंतु॥ॐश्रीयंतर्पयामि॥लक्ष्मीं॰ वरदां॰ विष्णुपत्नीं॰वसुप्रदां॥हिरण्य
रूपां॥सुवर्णमालिनीं॥पद्मवासिनीं॥पद्महस्तां॰पद्मप्रियां॥मुक्तालंकारां॥सूर्यां
चंद्रां॰विश्वप्रियां॰ईश्वरीं॰भुक्तिं॰प्रभुक्तिं॰विश्वभुक्तिं॰सद्धिं॰समृद्धिं॥अथाग्निपुरा

×इतिमंत्रकोशेश्रीसूक्तविधिः॥१

गो शांतिस्नाने ॥ सर्वौषसाधनं स्नानं विद्पे शांतिकरं स्मृतं ॥ स्नापयेद्ध सरित्तीरे यत्ना
दिंष्टविवर्द्धनः ॥ देवालये ज्वरार्त्तादौ विनायकयतादिते ॥ वीघातीर्थे ह्रदे गेहे जप
कामस्य तीर्थके ॥ पद्मिन्याः स्नापयेत्तीरे गर्भोपस्त्याः स्त्रवेत्तु या ॥ अनेकसंनिधौ प्रा
प्य जातो यस्य विनश्यति ॥ पुष्पार्थिन्याच पुष्पाद्ये पुत्रिणी चैव साध्ना रोगे गेहे सौभाग्य
रूपायां सर्वेषां विष्णुसंनिधौ ॥ विस्मृतौरवेती पुष्ये सर्वेषां स्नानमुत्तमं ॥ स्नानकामस्य
सप्ताहं पूर्वं तु स्वादनस्य पदं ॥ पुनर्नवा रोचना श्वेता क्रा गुरु तां त्वचं ॥ मधुकं रजनिद्वे
च तगरं नागकेसरं ॥ आसुरां चैव मंजिष्ठा मांसी पवसमर्द्धके ॥ प्रीयंगु सर्षपा पुष्पं वचा
शाल्मी कुवेकुमं ॥ पंचगव्यं सकुमिश्रं तु द्वत्य स्नानमाचरेत् ॥ लेके मंडले कर्णिकायां
पि वसुब्रह्माणमर्चयेत् ॥ मध्ये कोमंहरं पूर्वं मंत्रपर्वा दिदिक्रमात् ॥ लिखेदिंद्रादिको
देवान्सायुधान्सहवाहनान् स्नानमंडलकोन्दिह्युकुर्यां चैव विदिक्षु च ॥ वि

०श्री०
॥२८५॥

स्तु

स्तुत्र्यत्रेशशाकादिन्सहस्राण्यपिहोममपेत्॥ एकैकस्यत्वष्टशतंसमिधःस्युस्तिलैःसह
घृतंरुद्रःभद्रःसिद्धार्थःकलिहापुष्टिवर्धनः अमोघश्चित्रभानुश्चपर्जन्योथसुदर्शनः॥
घ स्थापयेत्तुंटानेतान्साग्निरुद्रमरुद्गणान्॥ विश्वेदेवास्तथादित्यावसवोमुनयस्त
या॥ श्राद्धेशाःसुतुसुप्रीतायाअन्यापिदेवताः॥ औषधीर्निक्षिपेत्तेषुजयंतींवि
जयाजयां॥ शतावरिंशतपुष्पांविष्णुक्रांतापराजितां॥ ज्योतिष्मतींबलांचैववचं
दनौक्षीरकेसरांस्कस्तूरिकांचकर्पूरंबालुकंपत्रकंत्वचं॥ जातिफलंसुगंधेचमृ
त्तिकाःपंचगव्यकांचनरूपीश्वेतस्थितंमध्येस्नापयेद्बुद्धिजोत्तमाः॥ राजाभिषेकमं सामु०
गै त्रोदेवानांहोमकःप्रयत्न॥ पूर्णाहुतिंततोदत्वागुरवेदक्षिणांददेत्॥ इंद्रोभिषिक्तो २८५॥
गुरुणापुरादैत्यान्जघानह॥ दिक्पालस्नानंकथितंसंग्रामादौजयावहं॥ इत्यग्नि भ
पुराणोक्तंसर्वार्थसाधनंशांतिः॥ अथैकवस्त्रस्नानं॥ विरसिंहाविलोकेरुद्रयामले॥

॥१॥

॥२॥ रान्तुः प्रलिपत्यन्न गडुरु॥ एक वासो विघिंब्रूति स्वामिन्वी स्तरतोमम॥ त्रिवड॥ स्फलुच्चार्गवय नेन दुः२॥

ॐ

पुत्रेण प्रार्थितः सर्वत्र वैचयनाशनं॥ विघ्नौघं विलयं याति यस्मिन्च स्त्रविधौ कृते॥
श्रीवो नामेति मंत्रेण दंपतिं परिधापयेत्॥ स्नापयेदेकवस्त्रेण स्नानं वा बहुदिने सति॥
अष्टपात्रे लिखेत्सप्तर्न्क्रमतः श्रुत्वा तंदुलैः वेदोक्तविधिना मंत्रैः॥ स्नापयेदेकवस्त्र
स्तक्रै वेदविधानतः॥ पंचवक्त्रं दशभुजं त्रिनेत्रं पार्वतीपतिं॥ पद्मे मध्ये न्यसेद्दे
वं शिवो नामेति मंत्रतः॥ इंद्रं विश्वेति मंत्रेण इंद्र मागे तयकोणके॥ येचेदमितिमंत्रेण
दक्षिणे दिग्यपूर्वजाः॥ यद्देवा स सूक्त मंत्रेण नैर्ऋत्ये सन कारयेः॥ वरुणः प्राविणा मंत्रा ता
पश्चिमे वरुणं न्यसेत्॥ गणानां त्वेति मंत्रेण वायव्या च गतोश्वरं॥ अग्निर्गोत्रा गौमि
त्रेण उत्तरे शर्कमातरः॥ ईशान्यां वग्रहान्सर्वान्स्थापयेत्स्वमंत्रतः॥ सतवः स्कंसेत्॥ स
मंत्रा पूर्वस्या विन्यसेत्स्मरं॥ तं मध्ये विन्यसेत्कुंभं पूरितं तीर्थवारिणा॥ पंचपात्रयुतं
मध्ये सर्षौषधसमन्वितं॥ सहिरण्यं सवस्त्रं च नालिकेरेण संयुतं॥ प्रतिष्टां च विधेः पा

धि

श्री
॥२८६॥

वायेन कृ

दैमंत्रैः पूजनमारभेत्॥ रुद्रजपेन्न त्रषंडंगविधिपूर्वकं॥ स्त्रीपुंसाभ्यां विधातव्यं पूज
नं विधिवत्ततः॥ अर्घ्यैकेवलं सम्यक्कृत्वा स्नानं विधानतः॥ नांदिमुख्यानि यंत्रा
डं विचेयं वीधिवत्पुनः॥ गंगोसित वैमंत्रेण प्राशयेत्तीउमध्यमंडले प्रार्थनां प्रत्यगा
णामते राजन्नजलानामधिपप्रभो॥ नष्टानष्टप्रसष्टात्वां गंगे देहि ममेप्सितं॥ नदी
नदतडागानि कूपदन्यजलाश्रयात्॥ तुल्यं विनानशोभंते गंगे देहि जलेश्वर॥ पूर्व
जन्मनियत्पापं कुसंसर्गोद्भवस्वयंकृतं॥ इहापि सतिलेस्थित्वा गंगे देहि प्रसीद मे॥
अष्टषष्टिश्च तीर्थानां नदीनामधिपो भवान्॥ सप्तानामपि वाद्धीनामीशा गंगे दद
स्व मे॥ त्वमेव पावनापाणिस्त्वमेव वद्यं भसांपतिः॥ अपस्कप्राणिनां जीवो गंगे प्रसिद मे। देहि
॥ तव हस्ते जलं वामे दक्षिणे जीवजीवनं॥ मस्तके वजापिं गंगे देहि दयापरा॥ कृतप्रे
तादिदोषाणां रोगाणाममितरस्य च॥ अंतरायं प्रभो छित्वा गंगे देहि दयां कुरु॥ इति जलप्रा

न

रामू
॥२८६॥

र्यना॥ अथौषधिस्नानं॥ सर्वेषांजगतेनानाग्रहाणामधीपःसदा॥ तवस्वामिसदासो
मे॥ देहि मे गंधं देहं मलौषधि॥ औदुंबरीफल्लवतिस्त्राख्वाया सर्वेमंत्रवित्॥ औषधयःसमि
त्येवंकामिन्याद्यर्थयेदुष्टः शाखायालंबनंकार्यंहृदिवेतासेनिर्मले॥ समालंभकरे हृ वीता
ल्लिकेराहृतानपि॥ वेदृतोपसिनंकुर्यास्नातिपाठपरायणः॥ ब्रह्माविष्णुश्च सोमस्यवंदर्पो
वृषवाहन॥ पार्वतीसुलगानद्वासावित्रीवस्त्रादेवता॥ एतेहिवासर्सिशुत्रेअव्यंगेगुरु
देवते॥ सार्वेत्रूषतारम्येवगर्डेमेधत्रंववांछितं॥ मुद्गतंदुलगोधूमयवंकंगुसुशालिनि॥ रा
५१ जमादिलिर्विद्वान्वंत्रापात्रंप्रपूरयेत्॥ विन्यस्यदीपकंतत्रफलानांसप्तकंतथा॥ धानावेते
तिमंत्रेण धान्यस्नानंतुकुकारयेत्॥ नालिकेरंचनारिंगंदाडिमंबीजपूरकं॥ उन्नतीमय
रुगंवसप्तमंमदनंस्मृतं॥ कूर्मपृष्ठनिलंपृष्ठेक्षीरनीरप्रपूरितं॥ त्रिनेत्रंशंभुदैवत्यंना
लिकेरंसुतप्रदं॥ वृत्तंकनकवर्णंचसुबीजंसुमनोहरं॥ इतिनेनसमंत्रेणस्नानंनारंगंगंधर्वदंमम।

श्री
॥१८७॥ ×फलं तच्छक्रदैवत्यं समस्तं वै स्तु परितं। सुरंगं सोमदैवत्यं ~~[illegible]~~।गर्भदं १

बिजपूरकं॥उग्रदर्कं समं पुष्पं फलं सीहूरसं निश्चं॥बीजपूरयुतं यस्यं गर्भदं दाडिमं मम॥
फलं तच्छक्रदैवत्यं सूत्रं वै सदृशोपमं॥ह्रोनयो निप्रपूर्णो बुद्देहि त्वं गर्भमुत्तवति॥पूगस्यस्तु
यं दैवत्यो लाह्मारसमप्रभः॥आद्रिः फलानां प्रवरो गर्भदं घासदा मम॥उत्तवेषु च सर्वेषु सुसं
दं सर्वदैवतं॥गोरोचनसमाभासं गर्भदं मदनं फलं॥इतिफलैः स्नानं॥अथौषधिस्नानं॥
वधोवरश्वराश्वराश्चाच एलाचिववकेतया॥धान्यानि शाखाबहुफला सर्वौषध्य इमाः स्मृ
तः॥पाप्मा ओषधि इति मंत्रेण सर्वौषध्यान्विलेपनं॥करेताम्रपर्णिं विन्यस्य वंशपात्रं तु तार्गवं॥
संवेदोक्तास्सप्तमंत्रान् तत्वायामिति पूर्वकान्॥धीमान् प्रसेकमुच्चार्य दंपती स्नापयेत्ततः॥
वरुणाः प्राविता मंत्रं वरुणास्यो त्तंभनं ततः॥येते शतमिमं मे च इदमापः पुनंतु मां॥इमां
वैयजुषो मंत्रान्शिरो मे त्यनुरुक्रया॥घृतवति भुवनानां पावमानीः पुनः २॥साम्नो वरु
णासाम्नाय पावकानः सरस्वति॥शन्नो देवीत्यापवतौर्मंत्रैः स्नानमुदाहृतं॥ततो रुद्रजप

रामः
॥१८७॥

स्नानंकर्त्तव्यंसुतमिच्छता॥अयन्त्रागर्जवैसंस्थाप्यस्थंडिलेपावकंसुचे॥ग्रह्योक्तेनविधा
नेनपायसंस्त्रपयेच्चरूं॥आघारावाज्यभागौ च देयातत्र च घृताहुती॥आथर्वपृष्ठंनिहोताच
पुनस्त्वाधतयातमित्॥वाजःपुरस्तादग्नेत्वं आदित्यंगर्भमेवच॥ततःसरस्वतीयोन्यां
तंपत्नीत्रिरतःपरं॥अदित्यैरास्नासिमंत्रेणौयेनऋषयोपिच॥गन्धोअस्यौषधीनांचमंत्रा
कौहुतयःक्रमात्॥एभिर्मंत्रैश्चरुंहुत्वाततःस्विष्टकृतंहुनेत्॥सषत्त्रंब्राह्मणोदद्यांचार्येस्तु
६ रत्रिंतया॥नरेभ्योपिविप्रेभ्यो~~पिविप्रेभ्यो~~दक्षिणा॥स्वशक्त्यापुनःअभिषेकंततःकुर्यात्स
विचित्रंकुंभवारिणा॥सुरास्त्वामितिमंत्राद्यैःपवित्रैर्ब्राह्मणोस्ततः॥आशास्याःकामहेमिंतु
तद्धयेत्पल्लसप्तकं॥सदीपंवंशपात्रेचनिधायायाचिवालयं॥शिवस्यपुरतोमुक्तावंशापा
त्रंप्रताम्यच॥देवदेवजगन्नाथंमंगोरीनाथमहेश्वरं॥नवेसीनमहादेवनमोस्तस्तुतदोक
व॥अष्टौदोषाश्चयेस्त्रीणांनवमःपुरुषस्यच॥तमद्दोषविनाशायसस्त्रीकःस्नानमाच

श्री०
॥१८९॥

रेत्॥ विकृतं यच्चमे देहे संतानपरिपिडनं॥ तत्सर्वं वस्त्रमायातु निर्दोषा स्यां सुपुत्रिणी॥
वरुणत्वं च भूतानां मुख्यसे कारकः प्रभुः॥ तव तीर्थप्रभावेन संतानं कारिमे बहु॥ ततः अ
रुपुरोडाशमाघृतेत्यादिना शायेत्॥ जेनैर्देहिच्छगंदेह आपं तनः पितरस्तया॥ ब्राह्मणान्भो
जयित्वा च वरं दत्वा विसर्जयेत्॥ इदं निर्मूलमपि गुर्जरेषु प्रचारादुक्तं॥ इति विरसिंहा
अत्रशोधपत्रं५ वलोकेरुद्रयामलोक्तैकवस्त्रस्नानं॥ अथैकाले गजनमदे शांति॥ अद्भुतसागरे गर्गः॥
ऊर्ध्वं विंशांति वर्षान्तु मदो भवति वारणे॥ तदूर्ध्वं यदि माद्येत स्वामिनो मरणं दिशेत्॥
कारयेत्तत्र शांतिं च ब्राह्मणान्स्थापितर्पयेत्॥ एकरात्रोषितः स्नात्वा प्रियः प्रयतमानसः॥ राम०
अष्टोत्तरसहस्रं तु मंत्रं वापि न येद्बुधः॥ ततः प्रज्वलमंत्रैस्तु सलिलं वाभिमंत्र ॥१८९॥
नो येत्॥ गजं गजांगजतत्वज्ञः सर्वदोषप्रहं शुभं॥ गजस्नानं प्रकुर्वीत तद्दिने तूर्यस्वनिस्व
नैः॥ पूर्वाह्णे चाग्निकार्यं तु कृत्वा कुंभ ज्ञाते न हि॥ ततो होमं प्रकुर्वीत विधिदृष्टेन होमवि

त॥ अग्नये स्वाहा॥ रुद्राय॰ गणपतये॰ वरुणाय॰ ब्रहस्पतये॰ शुक्रायेंद्रायेति॥ स्नानं कु
र्यात्तेनैतत्सर्वोपद्रवनाशनं॥ द्विजं जनपूर्वं स्यां सलिलं गुडमिश्रितं ततः कृत्वा॥ यव
यावकसंयुक्तं पिंडमधुनाय धूपयेद्धकुरां॥ कृतपूजासंस्कारं गणाधिपं चंदयेद्रूणां॥ ईश्व
रस्य महासं धमसुमालालाटसंन्नव॥ इदं कृतोपनीतं तु नैवेद्यं नक्ष्यत्स्वनः॥ नैवेद्यमंत्रः॥
अथ यागो करिणीमदनैशांतिं॥ तत्रैव राजपुत्रः॥ मदं यदा तु सुरक्ति विसर्ज्ये स्तूतिमे वक्ष॥ पु
रे राष्ट्रे वने वापि गृहे रा हस्तिनां यदि॥ मत्तानां मूत्रपुरिषाणि यदा संघ्रापतिष्ठति॥ मत्तया ग
न्यते युद्धे हस्तिन्या यदि वारणाः॥ महद्भयं तत्र जनवेदेशस्य नगरस्य वा॥ उपोष्यवांध वैस्त
त्रसामात्यं पुंस पुरोहितः॥ हस्तिवत्कल्पितां धेनुं विषाणान्पां वयोजीतां॥ अथैनां हस्ती
नीं निःचारात्रुधां राष्ट्रविमोहये॥ इत्येवमेतां कुर्वीत्तरात्रौ वननिवासिनी॥ अथवा पूर्वव
त्कलोशांतिकृत्वोपनेद्वयं॥ सुवर्णेन सुतप्तेन वंशे चाविधारयेत्॥ इति गोकरिणीमद

स्त्री॰
॥२८९॥

शांति॥ अथ पंचकमृत्यौ शांतिः॥ मदनरत्ने गारुडे॥ आदौ कृत्वा धनिष्ठार्धमेतं न
क्षत्रपंचकं॥ रेवत्यंतं सदा दूष्यमत्र दाहकर्मणि॥ शवस्य तु समीपे तु दर्भव्याःपुत्त
लास्तदा॥ दर्भमायास्तु चत्वारः ऋक्षमंत्राभिमंत्रिताः॥ ततो दाहः प्रकर्तव्यस्तैश्च पुत्तल
कैः सह॥ सूतकांते ततः पुत्रैः कार्यं शांतिकपौष्टिकं॥ पंचकेषु मृतो यो वै न गतिं लभते नरः॥
तिलांश्चैव हिरण्यं च तमुद्दिश्य घृतं ददेत्॥ क्रियानिबंधे॥ नाजनोपानहौ छत्रं हैममुद्रा
च वाससी॥ दक्षिणा दीयते विप्रे सर्वपातकमोचनी॥ मदनरत्ने गर्गः॥ यदि भद्रातिथीनां
स्याद्भानुभौमशनैश्चरैः॥ त्रिपादृक्षैश्च संयोगो द्वयोर्योगे द्विपुष्करः॥ द्वित्रिपुष्करयोगे तु
मृतिमृत्यंतरावहा॥ दहने मरणे चैव त्रिगुणं स्यात्त्रिपुष्करे॥ खननेप्येवमेव स्यादेत
दोषापशांतये तिलपिष्टमयैर्वापि शरीरं कारयेत्ततः॥ शय्यां निधायालंकृत्य दाहयेत्स्तूपकोपरि॥
बौधायनः॥ अस्मात्त्वमिति त्रेताग्नि तिलपिष्टं प्रदापयेत्॥ द्वित्रिपुष्करयोर्योगे त्रिस्त्रिः कृच्छ्रं व्यपोह

मं

राम॰
२८९॥

ने त

वाससैंमरणांचेत्स्यादूहेवापिपुनर्मृतिः॥ सुवर्णोदक्षिणांदद्यात्स्वस्वयमथापिवा॥ वासवंप
निष्ठा॥ ब्राह्मे॥ कुत्रमीनस्थितेचंद्रेमरणांयस्यजायते॥ नतस्योर्ध्वगतिर्दृष्टासंततौनसुखं
भवेत्॥ नतस्यदाहःकर्त्तव्योविनाशांत्येषुजंतुषु॥ अथवादृौनेकार्योदाहस्तविधिपू
र्वकं॥ धनिष्ठापंचकेजीवोमृतोयदिकथंचन॥ त्रिपुष्करेयाम्यऋक्षेवाकुलजान्मारयेद्ध्रुवं॥
तत्राऽनिष्टविनाशार्थेविधानंसमुदीर्यते॥ दर्भाणांप्रतिमाःकार्याःपंचोर्णासूत्रवेष्टिताः॥
यवपिष्टेनानुलिप्तास्ताभिःसहशवंदहेत्॥ प्रेतवाहःप्रेतसखःप्रेतपःप्रेतभूमिपः॥ प्रेतह
र्त्तापंचमस्तुनामान्येतानिवैक्रमात्॥ अत्रप्रतिमःसंपूज्यशिरोनेत्रवामकुक्षि।नाभि
पादेषुक्रमेणान्यस्यतन्नामभिर्घृतंहुत्वायमायसोमंत्र्यंबकमितिमंत्राभ्यांप्रत्येकंतास्वा
ज्यंहुनेद्वि[illegible]तिलदश॥ सूतकांतेततःपुत्रःकुर्याच्छांतिकपौष्टिकं॥ कांस्यपात्रस्थितंतैलं
वीक्ष्यदद्याद्द्विजन्मने॥ ब्रह्माविष्णुमहेशांश्चवरुणंप्रीतयेततः॥ माषपुंडुयवव्रीहिप्रियंग्वा

मु

श्रा०

दद्विप्रयच्छति ॥ सूर्ववैतोदानं रुद्रजाप्यं तु होमो द्विजोर्चनं ॥ गोनूदानं षडंत्रोनकुर्याद्दो
षापशांतये ॥ अपरार्के स्मृत्यंतरे ॥ घनिष्ठापंचके मृते पंचरत्नानि तन्मुखे ॥ प्रास्या
हुतित्रयं तत्र ऊनेद्धहवपामिति ॥ ततोनिर्हरणं कुर्याद्दिरी साग्निविधिः स्मृतः ॥ इत
रंनिखनेद्देवजले वाप्रतिपादयेत्वा ॥ त्रिपादहं मृते तद्वच्छिरस्पेशाकलं मुखे ॥ तस्या
पिष्टमयं कुर्यान्पुरुषं त्रितयं ततः ॥ होमं प्रतिमुखं कुर्यात्तयावत्हवपामिति ॥ कांस्याय
॥२९०॥ सं च कार्पासं तं प्रतिपाद्य च ॥ निर्यो त्यसाग्नि संस्कुर्यद्दुर्व्यग्नौ वान्यमुच्यते ॥ तत्रैव
कनकं हीरकं नीलं पद्मरागं च मौक्तिकं ॥ पंचरत्नमिदं प्रोक्तं सन्निधिः ॥ पूर्वदर्विर्तिकाः ॥ राम०
रत्नानां ताबाप्पत्नावे तु स्वर्णं कर्षार्धमेव वा ॥ सुवर्णस्याप्यतावे तु आज्यं देयं विचक्षणैः ॥ २९०
मदनरत्नेप्येवं ॥ तथा ॥ एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकं ॥ नवषट्त्रिपलं वापि
दद्याद्विप्राय शक्तितः ॥ अन्यत्रापि ॥ स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः ॥ अ

संकु मे प्प

ढप ॐ

न्वाध्यानंनिर्वपेत्॥देवतानांतयाहुतिः॥यमायधर्मराजायमृत्यवेचांतकायच॥वै
वैवस्वतायकालायसर्वभूतक्षयायच॥औदुंबरायदध्नायनीलायपरमेष्ठिने॥वृको
दरायचित्रायचित्रगुप्तायवैक्रमात्॥विप्रोनाम्रपलांकृत्वाएकैकामाहुतिंहुनेत्॥
कृष्णांगांकृष्णवस्त्रंवैनिष्कंसमंचितां॥दद्याद्विप्रायसंतायप्रितोभवतुसेयमः॥त्रिपा
दृष्टेप्येतद्देवंअपराकेपुनर्वसूत्तराषाढाकृत्तिकैकोत्तरफाल्गुनी॥पूर्वाभाद्रावि
शाखाचज्ञेयमेतत्त्रिपादृक्षंब्रह्मचारिमरणोकुष्टिमरणोगर्भिणीरजस्वलास्रुतिकाम
रणोविधानान्मन्यश्चविशेषोमभूतेनिर्णयसिंधौ श्री॥अथमृत्युंजयविधानं॥वसिष्ठ ढेप:४
कल्पोक्तंसंक्षेपोच्यते॥त्र्यंबकस्यविधानंतुकश्यपिष्येमुनीश्वरः॥यथोक्तविधिनायु
क्तंसंतंस्मृतंब्रह्मणापुरा॥मृत्युंजयस्त्रिधाप्रोक्तआद्योमृत्युंजयःस्मृतः॥मृतसंजीविनी
वैवमहामृत्युंजयस्ततःमृत्युंजयःकेवलःस्यापुरितोव्याहृतित्रयैः॥तारंत्रिबिजंव्याहृत्यः

संपेतो

श्री॰
॥१९२॥

× पुटितस्त्र्यंबकमनुर्मृतसंजीविनीमता॥स बीजोयं मृत्युमंत्रो यै महामृत्युंजयस्मृतः॥प्रणवव्याहृतीश्चैव प्रता
गमायाः चपदेस्तु॥ ततः त्र्यंबकमनुरंते व्याहृतयश्चता।३

पुटितस्तैस्त्र्यंबकः॥ महामृत्युंजयः प्रोक्तः सर्वमंत्रविशारदैः॥ मृतसंजीविनी तारं प्र
णवा व्याहृतीः पुरा॥ ततस्त्र्यंबको मंत्रः पुनरंते तथोच्चरेत्॥ मृत्युंजयोयमेवात्र कथि
तो मंत्रवित्तमैः॥ मायातादिकाश्चैव व्याहृतित्रितयं ततः॥ त्रिबिजप्रणवांते च वह्निजायामथो
च्चरेत्॥ प्रणवांते प्रसादस्य स्मृतिहारक एव च॥ तारादिव्याहृतयश्च त्र्यंबकेति च क्रं
ततः॥ विपर्ययेणात्रिबीजं तद्वच्च व्याहृतित्रयं॥ स्वाहांतो मनुरेषोत्र शुक्रेणाराधितः पुरा॥
महामृत्युंजयद्वितिविख्यातो नूनं त्रये॥ ॐकारैः संयुतः षड्भिश्चतुर्दशाक्षिरेव वा॥ मृत्युंज
येनं विधिवद्युपास्येप्सितमाप्नुयात्॥ तथा॥ बिंदुक्तैर्मंत्रवर्णैर्वा षडंगानां प्रकल्पना॥
हृदयं त्रिभिराख्यातं चतुर्भिः शिर उच्यते॥ शिखाष्टाभिः समुद्दिष्टा नवभिः कवचं मतं॥
पंचभिर्नेत्रमाख्यातमस्त्रं त्रिभिरुदाहृतं॥ पूर्वपश्चिमयाम्येषु वक्त्रेषु तदनंतरं॥ शिरो
गलास्याद्रियुग नाभि हृत्पृष्ठकुक्षिषु॥ लिंगपायूरुजंमूलांतजानुयुग्मे ततः परं॥ तद्वृत्तयुग्म

× तूर्णमंत्रं न्यसेद्धुर्वमनुसे त्र्यंबकस्यसंतकं।२

ग

रु

राम
॥१९१॥

रा
स्तनयोः पार्श्वयोः पादयोः पुनः॥ पात्योर्नासिकयोः शीर्षे मंत्रवर्णान्न्यसेत्क्रमात्॥ पद
न्येकादंन्यस्य शिरोन्त्रयुगलांघ्रिषु॥ वक्त्रे गंडयुगे नूपे हृदये जठरे पुनः॥ गुह्योरुजानु
पादेषु न्यासमेवं समाचरेत्॥ एतत्प्रयोगे व्याक्ते जीवीष्यति॥ आदौ प्रासादबीजं तदनु
मृतिहरं तारकं व्याहृतीश्च प्रोच्चार्य त्र्यंबकं यो जपति मृतिहरं नूपएवैतदाद्यं॥ कृत्वा
न्यांसं षडंगं स्त्रवदमृतकरं मेडलांतः प्रविष्टं ध्यात्वा योगीशरुद्रं सजयति मरणं शुद्ध
विद्याप्रसादात्॥ वेदादिन्नूरादिपदं च यं च मध्ये जपेन्मृत्युहरं त्र्यंबकं॥ जपेत्स लब्धायी वि
धिवत्प्रयुक्तं प्रासादमृत्युंजयसंपुटेन॥ ॐकारत्रितयाद्याश्च ॐकारत्रितयांतकः॥ [illegible]
व्याहृतित्रितयं चैव प्रासादत्रितयं तथा॥ ॐकारैर्मृत्युसंख्याकैर्ज्ञानीयं सर्वसिद्धये॥
महामृत्युंजयश्चैव मृत्युंजयस्त्रियंबकः॥ त्र्यंबकमृत्युर्युक्तः पूर्वं चांते द्वयेन च॥ महा
मृत्युंजये लोके शुक्राख्या मापगा ध्रुवं॥ बीजं बिनांच शुद्धस्तु मृत्युंजयसमाख्यकः॥

श्री०
॥[illegible]२॥

अंन्योमहामृत्युंजय इतिविद्यात्रिचाद्यमुं॥ तथान्यत्र॥ चतुर्दशः स्वरोयुक्तोहकारेण॥
चबींदुना॥ प्रासादाख्यंक्वचीद्बीजंसुप्रसन्नकरंमहत्॥ षष्ठःस्वरस्यसंयुक्तोजकारेण॥
चबिंदुना॥ मृत्युंजयंसमाख्यातंबीजंमृत्युंहरंपरं॥ सविसर्गःसकारश्चतारकंपरि
रिकीर्त्तितां॥ तारंस्थितंसकालेंदुन्तुगुःसर्गसमन्वितं॥ त्र्यक्षरात्मानिगदितोमंत्रोमृ
त्युंजयात्मकः॥ इतिमृत्युंजविधिः॥ विसिष्ठप्रोक्तो॥ कुंडस्यपूर्वविग्भागेकालीजि रि
ह्वाप्रकीर्त्तिता॥ आग्नेयांतुकाराली स्याद्दक्षिणेतुसलोहिता॥ मनोजवातुनैर्ऋत्यांधू
म्रवर्णातुवारुणे॥ स्फुलिंगिनीतुवायव्यां सौम्येविश्वरुचिस्तथा॥ काल्यांकराल्यां
वाकुर्याच्छांतिकंपौष्टिकंतथा॥ भूतप्रेतपिशाचादिशांतिर्लोहितजिह्वया॥ मनोजवायां
जिह्वायामभिचारोविधीयते॥ जुहुयाद्धूम्रवैतार्यी[illegible]कामोयदाभवेत्॥ स्फुलिंगि
नींतुयांकुर्यात्तस्यामुच्चाटनंविदुः॥ यातुविश्वरुचिर्जिह्वाकुंडस्योत्तरभागतः॥ सर्वार्थ
नी ज्ञि

राम०
॥२९२॥

वीं

दक्षपादमूले ॥ ऊं कापालिने० दक्षजानौ ॥ ऐं छागा वे दक्षगुल्फे ॥ रूं चंगीय दक्षपादांगुलिमूले ॥
त कं धात्रे दग्रेषु ॥ मिं अर्यम्णे वामोरुमूले ॥ वं मित्राय वामजानौ ॥ बं वरुणाय वामगुल्फे ॥
यं अंशाय वामपादांगुलिमूले ॥ नां त्स्त्रयाय तदग्रेषु ॥ रुं इंद्राय दक्षपार्श्वे ॥ त्योः यमाय वा
मपार्श्वे ॥ सुं पूष्णे पृष्ठे ॥ ह्रीं पर्जन्याय भ्रूमध्ये ॥ यं त्वष्ट्रे ललाटे ॥ मां विष्णवे शिरसि ॥ मृं प्रजा
पतये ॥ जले ॥ तां वषट्कारायहृदये ॥ प्राणं वं जपेत् ॥ अथापरः । त्र्यंबकं यं एतान्मुख
२ स्य पूर्वपश्चिमदक्षिणोत्तरेषु न्यसेत् ॥ जां तु उरसि ॥ मं गले ॥ हें मुखे ॥ सुं गं नेत्रयोः ॥ धिं ना
भौ ॥ पुं हृदि ॥ ष्टिं पृष्ठे ॥ वं र्धं कुक्ष्योः ॥ नं लिंगे ॥ उं पायौ ॥ र्वां ऊर्वोः ॥ रुं शिरसि ॥ अथ यहे माझे
शौनकोक्तो न्यासाः ॥ त्र्यंबकं यजामहे शिखायां ॥ सुगंधिं पुष्टिवर्धनं हृदये ॥ उर्वारुक
मिव बंधनात् बाह्वोः ॥ मृत्योर्मुक्षीय मामृतात्[illegible]नाभौ ॥ त्र्यं पादयोः ॥ बं गुल्फयोः ॥ कं जंघयोः ॥ यं
ऊर्वोः ॥ जां जंघने ॥ मं कटौ ॥ हें मेढ्रे ॥ सुं नाभौ ॥ गं कुक्ष्योः ॥ धिं पार्श्वयोः ॥ पुं कक्षयोः ॥ ष्टिं स्तनयोः ॥
वं हृदि ॥ र्धं स्कंधे ॥ नं कंठे ॥ उं कूर्परयोः ॥ र्वां मणिबंधयोः ॥ रुं कनिष्ठयोः ॥ कं अनामिकयोः ॥
× रुं कुं जानुनोः ॥ मिं वं जंघयोः ॥ बं धं स्तनयोः ॥ नां मृं पार्श्वयोः ॥ सों मुं पादयोः ॥ क्षीं यं पाणयोः ॥ मां मृं नासयोः ॥ ता ५

स्रीं

मिं मध्यमयोः॥ वं तर्ज्जन्योः॥ बं अंगुष्ठयोः॥ चं पाणितलयोः॥ नां कंठे॥ म्रं चिबुके॥ स्वीं मुखे॥ मुं
नासयोः॥ ह्रीं कर्णयोः॥ यं नेत्रयोः॥ मां ललाटे॥ म्रं मूर्ध्नि॥ तां शिखायां॥ एते केवलमृत्युं
जयन्यासाः॥ मतान्तरे तुं जये प्पतऽएव॥ किंतु प्रत्यहर्व्याहृति त्रयं सप्रणवं पूर्वं वदेत्॥ ॐ
भूः ॐ भुवः ॐ स्वः ॐ त्र्यं दहं पादमूले इत्यादि॥ ॐ ह्रौं ॐ जूं स इति वा प्रतिवर्त्तो प्रतिपदं द्वौ भा
वदेत॥ अथ नामषडंगः॥ ॐ ह्रौं ॐ जूं स ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा हृद
यायनमः॥ ॐ ह्रौं ॐ जूंसः ॐ नमो भगवते रुद्राय अमृतमूर्त्तये मां जीवय शिरसे स्वाहा॥ ॐ
ह्रौं ॐ जूंसः ॐ नमो रुद्राय चंद्रशिरसे जटिने शिखायै वौषट्॥ ॐ ह्रौं ॐ जूंसः ॐ नमो भं रुद्राय
॥२॥२॥२॥ त्रिपुरांतकाय ह्रां॥ ह्रीं ह्रूं कवचाय हुं॥ ॐ ह्रौं जूंसः ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्य २॥२॥२॥
जुः साममंत्राय स्वाहा नेत्रत्रयाय वौषट्॥ ॐ ह्रौं ॐ जूंसः ॐ नमो॰ रुद्राय प्रज्वलयाग्नित्रयाय ज्व
ल२ मां रक्ष२ अघोरमूर्त्तये अस्त्राय फ ५ट् स्वाहा॥ अथ द्वितीयः षडंगः॥ ॐ ह्रौं ॐ जूंसः ॐ
मोनें रुद्राय त्र्यंबकाय त्रिनेत्राय त्रिपुरांतकाय त्र्यंबके हृदयाय नमः॥ ॐ ह्रौं ॐ जूंसः ॐ नमो॰
रुद्राय नीलग्रीवायै शशांकधृतशेखराय अमृतवर्षितो पजामते शिरसे स्वाहा॥ ॐ ह्रौं ॐ जूं

ॐ५

सः ॐ नमो॰ द्राय व्याघ्रचर्मपरिधानाय शंकराय कपर्दिने सुगंधिं पुष्टिवर्धनं शिखायै वौ
षट्॥ ॐ हैं ॐ जूं सः ॐ नमो॰ द्राय स्रवदमृतचंद्रबिंबकलाधाराय कर्पूरगौराय शांता
य उर्वारुकमिव बंधनात् कवचाय हुं॥ ॐ हौं ॐ जूं सः ॐ नमो॰ द्राय रुग्यजुःसाममंत्राय ज्यो
तो तिरूपाय सांनात्मने मृत्योर्मुक्षीय — नेत्रत्रयाय वौषट्॥ ॐ ॐ हौं ॐ जूं सः ॐ नमो॰ द्राया
ग्निवीर्याय दुष्टग्रहनिवारणाय धूर्जटिने ऽघोरमूर्तये ज्वलस्थै२ रुद्रशक्तित्रिशूलधरनिसं ज्वल२
मां म ह२ सर्वतो दिशं अघोराय मामृतात् अस्त्राय फट्॥ ततः पीठहैममध्ये त्रितं तद्बहिश्चतुरस्रं तद्ब
हिः षट्कोणं तद्बहिरष्टदलं द्वयं ततश्चतुष्कोणमिति यंत्रं विलिख्य॰ धर्माय॰ ज्ञानाय॰ वैराग्या
य॰ ऐश्वर्याय॥ अधर्माय॰ अज्ञानाय॰ अवैराग्याय॰ अनैश्वर्याय॰ तं तमसे॰ रं रजसे॰ सं
सत्वाय॰ कृताय॰ त्रेतायै॰ द्वापराय॰ ~~ऐश्वर्याय॥ अधर्माय॰ अज्ञानाय॰ अवैरा~~ सत्वाय॰ रं र
जसे॰ तमसे॰ सूर्यमंडलाय॰ सोममंडलाय॰ वह्नि॰ य॰ इति संपूज्य॰॥ मृत्युंजयस्य देवस्य चतु
र्भुजस्त्रिनेत्रकः॥ अक्षमालाधरो देवो दक्षिणेन तु पाणिना॥ वामेनामृतकुंडं च धारयेन्मृता

सो स्ता कन्वाद्धपामतरसेत ह्यावपंतं।शेत ह्याम्पातौ दधगंमगाक्ष वज्रवंक्षाम्कांनहेतंपर। अंकंम्मस्नकरदपामतपदं कैल्ना॰
संस्तं।शि र्यं स्वच्छांशोजगतं नयैं डुमुडुकुरुं देवंत्रिनेत्रंभजे इतीवा

म व~

न्वितां॥ वरदान्नपाणिश्चदिव्याभरणभूषितः॥ शुभ्रः सुनीलवासाश्चपद्मस्योपरिसंस्थि
तः इतिहेमाशुक्लेरीसा॥ अब्जस्वच्छाकारविंदस्थितडमरुकरांस्थितंपूर्णाकुंभौद्वाभ्यां॥ वेदादे
क३ मालेनिजकरैर्मलाभ्यांघटौनित्यपूर्णौ॥ द्वाभ्यांतौवस्त्रवंतौशिरसिशशिकलाबंधरेखा
वयानः। सोयंदेवोदपानः प्रदिशतुविशदाकल्पजालः श्रियंवः॥ इतिप्रपंचसारमंत्रंको
शरीसाबद्धपिंगजटाजूटंनागभूषणभूषितं॥ द्वादशार्हंपंचवक्त्रमष्टादशभुजंविभु
मितिवाध्यात्वामूलेननासाग्रमार्गेणमध्येदेवमावाह्यस्थापनीसंनिध॰धापनी॥ संनि
रोधिनीमुद्राःप्रदर्श्यमूलेनासनपाद्यार्घ्याचमनमधुपर्कस्नानवस्त्रयज्ञोपवीतगंधपु
॥२००॥ पुष्पाणिसमर्प्य॥ वरुणपूजांकुर्यात्॥ मध्येईशानं॥ पूर्वेवक्त्रेनतत्पुरुषं॥ दक्षिणेवामदेवं॥ ॥२००॥
पश्चिमेघोरं॥ उत्तरवक्त्रेसद्योजातं॥ ततः षडंगेन आग्नेयादिकोणेषु॥ ह्रांहृदयाय॥ ह्रींशि
रसेस्वाहा॥ ह्रूंशिखायैवौषट्॥ ह्रैंकवचायहुं॥ ह्रौंनेत्रत्रयायवौषट्पूर्वे॥ ह्रः अस्त्रायफट्पुर
तः॥ निवृत्यै॰ प्रतिष्ठायै॰ विद्यायै॰ शांत्यै॰ इतिचतुःकोणे॥ गंगणपतये॥ मांमातृभ्यः॰ नारसिंह्यै॰ ऐं~
मंमत्स्यवे॰ दुंदुर्गायै॰ क्षंक्षेत्रपालाय॥ इतिचतुःपत्रे॥ अथाष्टदले॥ ब्राह्म्यै॰ माहेश्वर्यै॰ कौमार्यै॰
वैष्णव्यै॰

त्रयार

वाराह्यै० वाराह्यै० तद्बहिः॥ वंड भैरवाय० क्रोधभैरवाय० उन्मत्तभैरवाय० कपालभै
रवाय० संहारभैरवाय० आपदुद्धारकभैरवाय० कालभैरवाय० गौरभैरवाय० तद्बहिः
जयायै३विजयायै० अजितायै० अपराजितायै० भद्रकाल्यै० कपाल्यै० हेमायै० मृत्यु
पराजितायै०॥ तद्बहिः लं इंद्राय० सं अग्नये० यं यमाय० निं निर्ऋतये० वं वरुणाय०
सं सोमाय० हं ईशानाय० ब्रह्मणे० क्रों विष्णवे। ईति संपूज्य मंत्रकोशेतु षडंगैः प्रथ
मावरणं॥ सूर्याय० दूं इंदवे भूम्यै तोयाय अग्नये आकाशाय आत्मने नम इति द्वितीयं॥
रामायै० राकायै० प्रभायै० ज्योत्स्नायै० पूर्णायै० उषायै पूरिणायै नम इति तृतीयं॥ विश्वायै॥ वि
धायै॥ सितायै पुष्ट्यै० संध्यायै० दारायै० शिवायै० निशायै इति चतुर्थं॥ लोकपालैः पंचमं त
द्वस्त्रैः षष्ठमिं धूपदीपनैवेद्यफलतांबूलंदक्षिणानीराजनप्रदक्षिणानमस्कारान्कृत्वा॥ मृत्युं
जयमालारुद्रत्राहिमांशरणागतं॥ जन्ममृत्युजरारोगैः पीडितं कर्मबंधनैः। तावकस्त्वऊतप्रा
तास्त्वंचित्तोहंसदामृड॥ इति विज्ञाप्य देवेशं जपेन्मृत्युंजयं परं॥ ततो जपं कृत्वा पुनः षडंगं कृ

यावरणान्युक्तानि २

चाऽऽज्ञां पं निवेदयेत्॥ अयुतं पुरश्चरणं॥ ततः प्रयोगः॥ अथ मंत्रोद्धारः॥ ॐ ॐ भूः ॐ भुवः
ॐ स्वः ॐ त्र्यंबकं सपूः ॐ स्वः ॐ भुवः ॐ भूः ॐ इति मृत्युंजयः केवलास्तग्वा ॐ जूं सः इ
ति पूर्वो ॐ हौं जूं सः ॐ भुर्भुवः स्व इति पूर्वो॥ अंते प्रतिलोमं सर्वं इति वा॥ महामृत्युंजय
स्तु यथा॥ ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यंबकं सपू॥ ॐ स्वः ॐ भुवः ॐ
भूः ॐ ॐ सः जूं ॐ हौं ॐ स्वाहा॥ इति चतुर्दशप्रणवः॥ सविधाने॥ त्रिरात्रं नियतो नम्र
स्त्रन्नश्रपयेत्पायसं चरूं॥ तेनाहुतिशतं पूर्णां जुहुयात्सर्पिषा द्विजः॥ स समुद्दिश्य महा
देवं त्र्यंबकं त्र्यंबकेश्वर वा॥ एतत्पवेशातं कृत्वा जीवेद्वर्षशतं सुखी॥ ॥इति कमला
॥२०९॥ करभट्टकृते शांतिरत्ने मृत्युंजयविधिः॥ अथ पुरुषसूक्तविधिः॥ विष्णुधर्मोत्तरे पु ॥२०९
ष्कर उ॰॥ प्रतिवेदं महाभाग यत्सूक्तं पौरुषं स्मृतं॥ सर्वकामकरं ज्ञेयं पवित्रं मधुसूदनं॥ ॥ च३
एकैकया सवाराम स्नातो दत्त्वा जलांजलीन्॥ पौरुषेणानु सूक्तेन मुच्यते सर्वकिल्बिषैः॥
अंतर्जलगतो जप्त्वा सूक्तमेतत्तु पौरुषं॥ सर्वकल्मषनिर्मुक्तो यथेष्टां लभते गतिं॥ एकैक

चरुशेषं स्वयं भुक्त्वा पुत्रं प्राप्नोति मानवः॥ पौर्णमास्यां तिलौं हुत्वा घृताक्तान् विंदसुतैतं॥ गो
चर्ममात्रमालिप्य मोक्षये गोमयेनाथ भूतले॥ धान्यराशौ न्विनिक्षिप्य तन्मध्ये स्थापयेद्बुधः॥
विंशतिकलशांस्तत्र सितसूत्रेणावेष्टितान्॥ तीर्थतोयेन संपूर्णान् भूषितान् पल्लवादिभिः॥
त्रैयंबकेन मंत्रेण ततस्तानभिमंत्र्य च॥ अथ वंध्यां स्त्रियं तैस्तु कलशैरभिषेचयेत्॥ अचिराल्ल
भते पुत्रमायुष्यंतं यशस्विनं॥ वस्त्रकामस्तु जुहुयात्कुसुमैः कालसंभवैः॥ यद्वर्णं जुहुयात्पुष्पं त
द्वर्णं वस्त्रमाप्नुयात्॥ धान्यं तिलाज्यसंयुक्तं हुत्वा कन्यामवाप्नुयात्॥ देवतावस्त्रकामस्तु रुशीरस्य
न संयुतं॥ अष्टोत्तरसहस्रं तु जुहुयात्पायसेन वा॥ हविःशेषं स्वयं भुक्त्वा जपेन्मंत्रमिमं पुनः॥ पां दे
वतां समुद्दिश्य करोत्येवमतंद्रितः॥ प्रत्यहं हूता सा देवी वरमिष्टं प्रयच्छति॥ उल्लोकं वशे कुर्यान्न
मंत्रे रुद्रदैवते॥ करवीरसमिद्भिस्तु तैले नाघृतेन वा॥ अष्टोत्तरसहस्रं तु चैवोच्चाटयेद्रिपून्॥ नि
र्गुंडिकासमिद्भिस्तार्कक्षीररसंयुतैः॥ कालयं चरहोमं तु कुर्वतो नाशयते रिपुः॥ उन्मत्तसमिधो होमावै
रस्योच्चाटनं भवेत्॥ अथान्यदपि यत्क्रूरं कल्पोक्तं मरणादिकं॥ तत्सर्वं नैव कर्तव्यं ब्राह्मणे नृपतौ
यथा॥ इति वसिष्ठकल्पः॥ दानहेमाद्रौ शौनकः॥ त्र्यंबकं यजामहे इति शिवायां न्यसेत्॥ [illegible] गुरुसु
गंधिं पुष्टिवर्धनमिति हृदये॥ उर्वारुकमिव बंधनादिति बाह्वोर्मणिबंधने॥ मुक्षीयमामृतादिति

अभशोधपत्रं २ स्तु॰ ४ लै ५ म सोरिणिगुलि॰ १

नाभौ॥ पादगुल्फे चैजंघोरुजघने कटिमेढ्रयोः॥ नाभौ कुक्षिद्वये पार्श्वे कक्षयोः कुचयोर्हृदि॥ स्कंधे चैक
त्वाटिकायां च कूर्परे मणिबंधके देवि पुरातो॥ ॐ जूं सः इति मंत्रोयं ख्यातो मृत्युंजयः परः॥ मृ
त्युंजयस्तु देवोयं चतुर्भुजस्त्रिनेत्रकः॥ अक्षमालाधरो देवो दक्षिणेन तु पाणिना॥ वामेनाम
तकुंडं च धारयंन्नमृतान्वितां॥ वरदाभयपाणिश्च दिव्याभरणभूषितः॥ शुक्लः सुनीलवासा
श्चपद्मस्योपरिसंस्थितः॥ तौ ज्ञां जीतस्य शिरो ज्ञेयं जैवं स्या श्वत्रिख्या वं ने॥ अष्टौ तु शक्तयं पु
ज्याः पंचाहरस्समन्विताः॥ जया च विजया चैव अजिता चापराजिता॥ भद्रकाली कपालि च दे
यामृत्युंपराजिता॥ ॐ जूं सः इति मंत्रेण पूज्यो मृत्युंजयः शिव इति॥ अथ प्रयोगः॥ कर्त्ता देशका
लौ स्मृत्वा मम मजीवच्छरीराविरोधेनामुकरोगस्य समूलनाशेनापमृत्युनिवारणद्वाराक्षिप्रा
रोग्यार्थममुकं संख्यया महामृत्युंजयमंत्रजपं करिष्ये विप्रद्वारा कारयिष्ये इति वा संकल्प्य
गणेशपूजा पुण्याहवाचनमातृपूजा वृद्धिश्राद्धानि कृत्वाचार्यं वस्त्राद्यैर्वृणुयात्॥ अथाचा
र्यं आचम्य प्राणानायम्य देशकालौ स्मृत्वामुकस्यारोग्यार्थममुकाहंपात्र्यंबकपूजनं जपादि
करिष्ये इत्युक्त्वा पृथ्वीति मंत्रेणासनं कृत्वापसर्पं। त्विति भूतान्युत्साद्य तालत्रयं मूलेन लमि
ति वा म॥१२॥ वामनासामापूर्य मूलं यमिति वा १६॥ कुंभकं कृत्वा मूलेन १२ रेचयेत्॥ यमिति १२ दे
१ हं संशोषयमिति ~~वा १२ वामनासामापूर्वंमूलं~~ १

पीः॥म होंजं
ताद

ॐलो

अथ पदार न्यासः। ॐ त्र्यं० मूर्ध्ने। ऊर्ध्ववक्त्राय नमः। ॐ सुगं० ध्नि। पश्चिमवक्त्राय०। ॐ उर्वा० नाभौ। दक्षिणवक्त्राय०। ॐ मृत्यो० नाभौ।
उत्तरवक्त्राय०। ॐ सर्वर्चा० ऊर्ध्ववक्त्राय०। अथ अक्षरन्यासः। त्र्यं शिरसि। बं कंठे। कं मुखे। यं अंसे। जां नेत्रयोः। मं नासौ। हे हृदि। सुं हृदे।

गं धिं कु
क्षौ। पु
ष्टिं जे।
वर्धिं ना मे ३
धौ। नं धं
नौ। नं य
नौ। उं त
न्वं कौ। मं
जौ। त्रे। रू
कं ऊ चौ।
दं यं जंघ
यो। वं धं
नौ नयोः।

त्र्यग्निबीजेन दग्ध्वा वमित्यमृतबीजेनाप्लाव्य आत्मन आकाशः आकाशाद्वायुः वायोरग्निर
ग्नेरापोद्भ्यः पृथिवी तस्या देहोत्पत्तिं विचिंत्य तमित्यमृतं स्त्रावयित्वा। प्राणप्रतिष्ठां कृत्वा शि
वोहमिति विचिंत्येष्टदेवं नत्वा वां गुरुं परमगुरुं परापरगुरुं परमेष्ठिगुरुन् स्वबीजनामभिर्न
त्वा दक्षिणतो गणेशं दुर्गां क्षेत्रपालान्नत्वा मूलेन करशुद्धिं कृत्वा मूलेन प्राणानायम्य अ
स्य श्रीमहामृत्युंजयमंत्रस्य वसिष्ठ ऋषिः अनुष्टुप्छंदः मृत्युंजयो रुद्रो देवता हौं बीजं जूं शक्तिः
ॐ कीलकं जपे वि०॥ शुद्ध त्र्यंबके त्र्यं बीजं आं शक्तिः बं कीलकमिति मंत्रकोशे शिरोमुख
हृदयागुह्यपायुपादेषु ऋष्यादीन्विन्यस्य मूलेन करशुद्धिं कृत्वा ॐ अग्नये हृदयाय नमः॥
त्र्यंबकाय शिरसे स्वाहा॥ त्रिनेत्राय शिखायै वौषट्॥ वासिष्ठाय कवचाय हुं॥ अनुष्टुप्छंदसे
नेत्रत्रयाय वौषट्॥ रुद्रो देवता अस्त्राय फट्॥ अथ षडंगः॥ त्र्यंबकं हृदयाय नमः॥ यजा
महे शिरसे स्वाहा॥ सुगंधिं पुष्टिवर्धनं शिखा वौषट्॥ उर्वारुकमिव बंधनात्कवचाय हुं॥ य
मृत्योर्मुक्षीय नेत्रत्रयाय वौषट्॥ मामृतात् अस्त्राय फट्॥ अथाक्षरन्यासः॥ सर्वे
त्र प्रणवादिनमोंतत्वं॥ त्र्यं दक्षपादमूले॥ बं दक्षजानुनि॥ कं दक्षगुल्फे॥ यं दक्षपादांगु
लींमूलं पार्श्वयोः। यों मुं पादयोः। श्रीं यं पार्श्वयोः। मां मं नासयोः। ।ा र। शिरसि। २

प्रणवं क
रतलयोर्न्य
स्य ७

य

ते

ल्लिमूलेषु॥ जां दक्षाग्रेषु॥ मं वाम पाद मूले॥ ~~धं हृदये॥ नं कंठे॥~~ यां वं सक्ले जानुनि॥ हं वा मजा
म जानुनि॥ सुं वाम गुल्फे॥ गं वाम पादांगुलिमूले॥ घिं तदग्रेषु॥ पुं गुह्ये॥ त्रिं आधारे॥
वं उदरे॥ धं हृदये॥ नं कंठे॥ मं वीरुं कमिं इत्येतानि दक्षबाहुसंधिषु॥ बं नं पं नां मुं वामबाहु
संधिषु॥ लं त्यों मुखे॥ मुं ह्निं दक्षवामनासयोः॥ यं नेत्रयोः॥ रावत्या॥ मां कर्णयोः॥ मं भ्रुवोः॥
सर्वत्र नमोंतं ५ तार शिरसि॥ अथ पदन्यासः॥ त्र्यंबकं शिरसि॥ यजामहे भ्रुवोः॥ सुगंधिं नेत्रयोः॥ पुष्टि
वर्धनं मुखे॥ वौ उरुकं गंउयोः॥ रव हृदयाय॥ बंधनात् उदराय॥ मृत्यो गुह्याय॥
प मुक्षीय उरुभ्यां॥ मामृतात् जानुभ्यां॥ अमृतात् पादाभ्यां॥ एते न्यासा मंत्रकोशेपि तुल्याः॥ अथा
ष्टवस्वादिन्यासः॥ ॐ त्रिं धराय॰ शिरसे नमः॥ यं ध्रुवाय नेत्राभ्यां॥ बं सोमाय क
॥एर्ट॥ र्णाभ्यां॥ कं आपाय॰ नासिकयोः॥ अनिलाय॰ मुखे॥ जां अनलाय॰ दक्षबाहुमूले॥ मं ॥एर्ट॥
प्रत्युषाय॰ दक्षकूर्परे॥ हें प्रभासाय दक्षिणबंधे॥ सुं वीरभद्राय दक्षांगुलीमूले॥ गं शंभ
वे तदग्रेषु॥ घिं गिरीशाय वाम बाहुमूले॥ पुं अजैकपदे वाम कूर्परे॥ षिं अहिर्बुध्न्याय॰ वा
ममणिबंधे॥ त्रिं नाकिने वामांगुलिमूले॥ धं अपराजिताय तदग्रेषु॥ नं भुवनाधीश्वराय॰

पि

साधकासेतिप्रोच्यतेमंत्रवित्तमैः॥अपरेवसुधारेतिजिह्वापूर्वोत्तरेविदुः॥कुंडेषु
मध्यमंत्राणेमग्नेरास्यंप्रवर्त्तते॥तस्मिन्सर्वाणिकार्याणिकारयेन्मारणंविना॥श्रो
पासनाग्निमानीयतस्मिन्कुंडेविनिक्षिपेत्॥अथवाश्रोत्रियागारान्मथितंवासमा
नयेत्॥अर्चयेल्लोकपालांश्चप्रागारभ्यप्रदक्षिणं॥कुंडेकृत्वाऽपराजागांतेसर्वमुल्ले
खनादिकं॥स्वगृह्योक्तविधानेनपायसेनैवहोमयेत्॥आयुःकामोघृतेनाग्नौजु
हुयाल्लक्षसंख्यया॥अयुतंवासहस्रंवाशतमष्टोत्तरंतुवा॥दूर्वात्रिकैर्वाजुहुयान्मधु
रत्रयसंयुतैः॥गुडूचीखंडकैर्वापिचतुरंगुलमायतैः॥अथवाजुहुयाद्विद्वा
न्मिश्रितैस्तिलतंडुलैः॥प्रक्षालितैस्तिलैर्वापिजुहुयाद्घृतप्लुतैः॥पलाशस
मिधोहुत्वासर्वमायुरवाप्नुयात्॥अथवातर्पयेद्देवमुदकेनसमाहितः॥आरोग्यका
मोजुहुयाद्दर्भकाष्ठैर्घृतप्लुतैः॥पयसवापिजुहुयाद्गव्येनाज्येनवापुनः॥पलाशसमिधा ६।

उ४ ड

३ सावरीकाळी

सुपाली

वापि सर्वरोगप्रसांतये॥ अछिन्नैराम्रपतौस्क्रपयोक्तैर्जुहुयाज्ज्वरे॥ गुडूचिखंडकैर्वा
पिरवादिरैर्वा घृतप्लुतैं॥ प्रमेहोमधुनाहोमः पयसा वा घृतेन वा॥ औदुंबरसमिद्भि
र्वा होमश्चामलकेन वा॥ गुल्मे शाल्मलिहोमः स्यात्तिलैः कृष्णैघृतेन वा॥ वर्धमा
नसमिद्धोमः सघःशूलहरो भवेत्॥ करंजसमिधो वापि निर्गुंडीसमिधोपि वा॥
तैलेनाक्तं जुहुयाद्वातरोगप्रशांतये॥ शमीसमिद्भिर्जुहुयादतीसारप्रशांतये॥
शांत्यर्थं माह्निरोगस्य पलाशसमिधा स्मृतः॥ उन्मत्तसमिधो हुत्वा अपस्मारात्प्र
मुच्यते॥ कुबेराह्निं द्ववल्लीयां नेत्रसूलेषु होमयेत्॥ तैलेनाभ्यज्य जुहुयाद्गुडूचि
खंडैस्तथैव च॥ मातुलिंगं गुडूचीनां होमः कोमलनाशनः॥ मधुरत्रयहोमेन शांतिः
स्याद्राजयक्ष्मणः॥ होमात्रूफलमूलानां गर्भरोगाः प्रशाम्यति॥ कुष्टे मस्तरिकाहोमो
मधुवितपसंयुतैः॥ छिन्नोत्फलैस्तु जुहुयान्पलाशैर्वा घृतप्लुतैः॥ अथवा तैलसंयु
क्तैर्जुहुयाद्गौरसर्षपैः॥ येचान्ये मुखरोगास्तु शिरोरोगास्तथैव च॥ तेसर्वे प्रशमं यां

तुरोगाणां १

त्रितिलैर्तैर्मा छुतम्लुतैः॥ औदराणां सर्वेषां शांतिमिच्छतां बिल्ववृक्षसमिद्धोमः कृ
र्तव्यो द्विजसत्तम॥ अधःस्रावे जुहुयात्पद्मपत्रैर्घृतप्लुतैः॥ हृद्वान्तिर्वा यथा॥ कृमि
जुहुयाच्चंदनेन वा॥ निस्यघत्व समिश्वरत्क श्रीवेतु होमयेत्॥ अथवा गोघृतेनैव
रक्तातिसारशांतये॥ अन्यरोगेषु सर्वेषु कंठरोगमहोदरे॥ त्रिलिः पलैस्क जुहुयान्म
धुक्षीरघृतप्लुतैः॥ मधुरत्रयहोमस्तु सर्वरोगप्रशांतिदः॥ आवेदेषु यत्प्रोक्तं यस्य रोग
स्य भेषजं॥ तस्य रोगस्य शांत्यर्थं तेनलेन च होमयेत्॥ अथवा तेन मंत्रेण पावमानीभि
रेव वा॥ प्रतीर्थतोयेन देवेशमभिषिंचेत्समाहितः॥ नूतज्वरग्रहादीनां सर्वेषामपि शां
तये॥ अथवा तर्पणं कुर्यान्मंत्रैः पूर्वोक्तसंख्यया॥ अथवा नियतारोहो जपेन्मंत्रं सहि मा४
तः॥ एवं होमं द्विजं कुर्यात्तर्पणं जपमेव वा॥ आयुरारोग्यसिद्ध्यर्थमात्मनो वा परस्य वा॥
हे एकाहं वा त्र्यहं वायिदशांतद्वादशातकं॥ पक्षं मासं द्विमासं वा यावत्त्रयमथापि
वा॥ अथवा चतुरो मासान् षण्मासानेकहायनं॥ न्वयेमहतिसंजातो दीर्घकालं

समाहितः॥ अल्पे त्वल्पकालं कुर्वीत जपहोमादिकं त्रयं॥ रोगकालोपयुक्तं यद्द्रव्यं त्राष्मा
स्नानादिकं॥ रोगमुक्तस्ततः सर्वं नोपयुंज्यात्कदाचन॥ अपमृत्युजयोपाय[illegible]
महं वक्ष्याम्यतः परं॥ मधुरत्रययुक्ताभिर्दूर्वाभिर्जुहुयाद्बुधः॥ सहस्रमयुतं वापि शत
मष्टोत्तरं तु वा॥ श्वेतार्ककुसुमैर्वापि जुहुयाद्घृतेन वा॥ अपामार्गसमिद्भिर्वा ति
नी लैः कृष्णैर्यवैरपि॥ अथवा गोघृतेनैव पयसा वापि होमयेत्॥ कपिलागोघृतं क्षीरं
सैंसंतिमगोंषिताः॥ शनैश्चरदिनेश्वत्थं स्पृष्ट्वान्मंत्रमिमं जपेत्॥ साहीन्मृतोपिमु
क्तः स्यात्किं पुनस्त्वपमृत्युभिः॥ अथवा पयसा देवमभिषिच्य घृतेन वा॥ पलाशख
॥ए०॥ दिराश्वत्थसमिद्भिर्जुहुयात्तु वा॥ बिल्ववृक्षोद्भवैर्वापि सोपमृत्योर्विमुच्यते॥ अ राम॰
यवाश्रपयित्वा चरुं रौद्रं द्विजोत्तमः॥ अष्टोत्तरशतं हुत्वाप्मृत्युं जयति मानवाः॥ अ ॥ए०॥
गर अथोपायां वक्ष्ये साहीन्मृत्युनिवर्तनं॥ हस्तमात्रप्रमाणेन वेदिं कुर्याद्विचक्षणः॥
तन्मध्ये स्थापयेत्कुंभं सितसूत्रेण वेष्टितं॥ तंडुलैर्व्रीहिभिर्वापि वपेल्लुवान्॥ प्रति
ष्ठाप्य तत्रालंकृत्य गंधमाल्याक्षतादिभिः॥ तत्रावाह्य महादेवं देवं त्र्यंबकं॥ पूजयेद्गंध
॥२तुरस्रं समंततः॥ वासोयुग्मेन संवेष्ट्य तीर्थतोयेन पूरितं॥ पल्लवान्क्षीरवृक्षाणामयवा चूतरा॥

३५ मीश्वरां ७

यास्तं वा स्नातः पुष्पं ध्येपुं निवेदयेत्॥ पुरुषार्थं जले राम सर्वपापैर्विमुच्यते॥ एकै
कयास चास्मातोदत्वा राम फलं २॥ सर्वकामानवाप्नोति यान्कांश्चिन्मनसेछति॥
पौरुषेणा तु सूक्तेन प्राणायामो महाफलः॥ जपहोमौ तथा राम सर्वकल्मषनाशनौ॥
सुरापो ब्रह्महा स्तेनस्तथैव गुरुतल्पगः॥ पापेभ्यो विप्रमुच्येत जप्त्वा सूक्तं तु पौरुषं॥
कृच्छ्रैर्विशोधितः पूर्वं मध्याह्ने सलिलोपगः॥ स्नातस्तु पौरुषं सूक्तं जपेन्नित्यमतंद्रि
तः॥ संवत्सरेणा देवेशं वासुदेवं प्रपश्यति॥ स्वयमेव महाभाग शाकमूलफलाशनः॥
तस्मात्काममवाप्नोति यं राम मनसेछति॥ श्रियमग्र्यां तथा रूपं जीवितं दीर्घमेव च॥
अणिमां लघिमां प्राप्तिं महिमां च नगच्छन्तमाडुरवायभयान्यद्वा यत्किंचिन्मनसेछ ग
ति॥ अकामः पौरुषं जप्त्वा याति विष्णोः परं पदं॥ मंगल्यमेतत्परमं पवित्रं संसारदुः
खौघविनाशकारि॥ सुखप्रदं धर्मविदां नराणां मनोरथावाप्तिकरं प्रदिष्टं॥ मातामो
वे सूक्तविधाने॥ संसारदुःखौघविनाशकारि॥ सुखप्रदं वक्ष्ये पुरुषसूक्तस्य विधानं

×स्मालायथोक्तविधिना प्राङ्मुखः शुचि
नरः ॥

त्विवेनं प्रति ॥ अग्निकार्यं जपविधिं स्तोत्रं वै च तदात्मकं ॥ प्रथमां विन्यसेद्वा
मे द्वितीयां दक्षिणे करे ॥ तृतीया वामपादे तु चतुर्थी दक्षिणे न्यसेत् ॥ पंचमीं वाम
जानौ तु षष्ठीं वै दक्षिणे तथा ॥ सप्तमी वामकट्यां तु अष्टमी दक्षिणे तथा ॥ नवमीं ना
भिमध्ये तु दशमीं हृदये तथा ॥ एकादशीं कंठदेशे द्वादशीं वामबाहुके ॥ त्रयोदशीं दक्षिणबाहौ
छन्न ५ न्यथा ॥ च आस्यदेशे चतुर्दशीं ॥ अक्ष्णोः पंचदशीं चैव षोडशीं मूर्ध्नि विन्यसेत् ॥ एवं न्या
संविधिं कृत्वा पंचांगानि समाचरेत् ॥ ब्राह्मणोस्येत्यादिकाभिर्ऋग्भिः पंचांगकल्प
ना ॥ हृदयं शिरः शिखा कवचमस्त्रं चेति पंचांगानि ॥ तत्रादौ संकल्पं कृत्वा न्यासद्व
यं कुर्यात् ॥ अस्य नारायणऋषिः पुरुषो देवतानुष्टुप्छंदः अंत्या त्रिष्टुप् जपादौ विनि २
॥२०२॥ योगः ॥ तत्र जपे होमे वार्चने नियतं ति[illegible]मिति तद्देवाह ॥ आद्यया वाहयेद्देव २०२॥
मृत्वा तु पुरुषोत्तमं ॥ द्वितीययासनं दद्यात् पाद्यं चैव तृतीयया ॥ चतुर्थ्यां र्घ्यं प्रद
तव्यं पंचम्यां चमनं तथा ॥ षष्ठ्यां स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव च ॥ यज्ञोपवीतमष्टम्यां
मंत्रन्यासं पुराकल्ला स्वदेहे देवतासु चागमञ्चोंकार-यम्मांगः फऊ
×यथा देहे तथा देवे न्यासं कृत्वा विधानतः ॥
ये द्विकुसुमयदां ५

×स्यानुलेपनं।पुष्पं दशम्यां दातव्यं मेकादश्यां तु धूपकं। द्वादश्यां दीपकं दद्यात्रयोदश्यां निवेदनं। चतुर्दश्यां
नमस्कारः पंचदश्यां प्रदक्षिणा। १

नवम्यां त्वैरसां तथा॥ दशम्यां गंधदानं स्यादेकादश्यां च माल्यकं॥ द्वादश्यां धूपदानं
स्यात्त्रयोदश्यां च दीपकं॥ चतुर्दश्यां तु नैवेद्यं पंचदश्यां नयस्क्रिया॥ उद्वासनं तु षोडश्या
उपचारस्तु षोडश॥ स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकं॥ दद्यात्पुरुषसूक्तेन यः
पुष्पाण्यप एव वा॥ अर्चितं तेन वै सर्वं त्रैलोक्यं सचराचरं॥ दक्षिणां तु यथाशक्त्या षोडश्य
र्चोप्रदापयेत्॥ ततः प्रदक्षिणां कृत्वा जपं कुर्यात्समाहितः॥ यथाशक्ति जपित्वैतु सूक्तं चास्मै
निवेदयेत्॥ देवस्य दक्षिणे पार्श्वे कुंडं स्थंडिलमेव वा॥ कारयेत्प्रथमं चात्र प्रोक्षणं तु द्विती
यया॥ तृतीययाग्निमादद्या चतुर्थ्यां तु समिंधनं॥ पंचम्यां त्वाज्यसंस्कारः स्रुक्स्रुवस्त्रपणं
तथा॥ षष्ठ्यामनलस्य मध्ये तु कल्पयेत्पद्मासनं॥ चिंतयेत्तत्र देवेशं कालानलसमप्रभं।
विवक्त्रास्यं वा तत्र शीर्षं रक्ताक्षं रक्तलोचनं॥ ततो गंधं च पुष्पं च धूपं दीपं नैवेद्यं॥ पंचविं
श्च ततः कुर्यात्सप्तम्यादि यथाक्रमं॥ वह्नौ पूजयेद्दित्य ये॥ समिधः प्रस्थवंद्य वै जुहुयाद्द
निधारिताः॥ ततो घृतेन जुहुयाद्वरुणाय ततः पुनः॥ एवं कृत्वा ततस्तस्य स्यास्त्रमिपेस्तोत्र

हयग्रीवं ३ ×श्चैनभजुका प्रपयश्राक्रमं। अग्नेर्भगवत १

मुच्येरत॥ जितंतेपुंडरीकाक्षनमस्तेविश्वभावना॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्व
ज॥ नमोहिरंण्यगर्भायप्रधानाव्यक्तरूपिणे॥ ॐनमोवासुदेवायशुद्धज्ञानस्वभाविने॥ दे स्व
वानांदानवानांचसामान्यमधिदेवतं॥ सर्वदाचरणद्वंद्वंव्रजामिशरणंतव॥ एकस्त्वम
सिलोकस्यस्रष्टासंहारकस्तथा॥ अध्यक्षश्चानुमंताचगुणमायासमावृतः॥ संसार
सागरंघोरमनंतंक्लेशभाजनं॥ त्वामेवशरणंप्राप्यनिस्तरंतिमनीषिणः॥ नतेरूपं
नचाकारोनायुधानिनचास्पदं॥ तथापिपुरुषाकारोभक्तानांत्वंप्रकाशसे॥ नैवकिं
चित्परोक्षंतेप्रत्यक्षोसिनकस्यचित्॥ नैवकिंचिदसिद्धंतेनचसिद्धोसिकस्यचित्॥ का
॥२०३॥ र्याणांकारणंपूर्वंवचसांवाच्यमुत्तमं॥ योगिनांपरमांसिद्धिंवदंतिपरमंविदुः॥ अ तेपरं ५
हंभीतोस्मिंन्भयावहे॥ पाहिमांपुंडरीकाक्षनजानेशरणंपरं॥ कालेष्वपिचसर ॥२०३॥
वेषुदिक्षुसर्वासुचाच्युत॥ शरीरेपिगतोवापिवर्धतेमेमहद्भयं॥ त्वत्पादकमलादन्य
न्यन्नमेजन्मांतरेष्वपि॥ निमित्तंकुशलस्यास्तियेनगच्छामिसद्गतिं॥ विज्ञानंयदिदंप्रा
प्तंयदिदंज्ञानमर्जितं॥ जन्मांतरेपिमेदेवमाभूदस्यपरिक्षयः॥ दुर्गतावपिजातायांत्वद्ग

देवेशसंसारेस्मि ४

तिस्त्वंमतिर्मम॥दुर्गतावपिजातस्यत्वद्गतोमेमनोरथः॥यद्दिनाथंचविंदेताबतास्मिकृती यं
सदा॥अकामकलुषुषंचित्तंममेतपादयोःस्थितं॥कामयेवैष्णवत्वंतुसर्वेजन्मसुकेवलं॥
इत्येवमनयास्तुत्यास्तुत्वादेवंदिनेदिने॥किंकरोस्मीतिचात्मानंदेवायैवंनिवेदयेत्॥पु
पुरुषस्यहरेःसूक्तंस्वर्ग्यंधन्यंयशस्करं॥फलाहारोजयेनित्यंयश्पन्मासानमासनि॥फका
नितुस्कोपवसेन्मासमङ्घ्रिश्चवर्त्तयेत्॥अरत्येनिवसन्नित्यंजपन्निमम्रषिंमुनिः॥सवि
मंत्रं॥संध्यिस्त्रिषवणांकालेस्नायाद्दप्सुसमाहितः॥स्नानेएतान्निर्मार्जनमघमर्षणाचेत्य
र्थः॥आदित्यमुपतिष्ठेतसूक्तेनानेननित्यशः॥आज्याहुतीरनेनैवकुर्याच्चैवंचिंतयेद्दषिं॥
ऋषिःसूक्तेऽस्यनारायणः॥ॐध्येमास्मैलाहारस्त्रिर्निर्वर्षेजपेदिदं॥तदुक्तंस्तन्मनायु
क्तोदशवर्षाण्यनन्यचारू॥साक्षात्पश्यतितंदेवंनारायणमनामयं॥अनौसादयमानोपि
भक्तिंनपरितापयेत्॥भक्तानुकंपीभगवान्जायतेपुरुषोत्तमः॥येनयेनचकामेन
जपेत्प्रयतःसदा॥ससंकामःसमृद्धःस्याद्बुद्धध्यानस्यमे~~भगवान्जायतेपुरुषे~~कु
र्वतः॥होमंवाप्यथवाजप्यमुपहारमथापिवा॥कुर्वीतयेनकामेनतत्सिद्धिमुपधारयेत्॥

स सासु

द्वादश्यां द्वादशीः सम्यक् पयसा निर्वपेच्चरुं। यः करोति सहस्रेणु यानि विष्णोः परं पदं। कुलानि विधिवत् सम्यगृग्भिः षोडशभिः कुं
कृतांजलिपुटो भक्त्या स्तवं वाग्भिः प्रयोजयेत्। केशवं मार्गशीर्षे तु पौषे नारायणं विदुः। माधवं माघमासे तु गोविंदं फाल्गुने तथा। चैत्रे
चैव तथा विष्णुं वैशाखे मधुसूदनं। ज्येष्ठे त्रिविक्रमं विद्यादाषाढे वामनं विदुः। श्रावणे श्रीधरं विद्या हृषीकेशं ततः परं। आश्विने पद्मनाभं तु

दामोदरम
तः परं। द्वा
दशैतानि
नामानि प्र
तिमासं तु
पूजयेत्।
आकुर्वं
न्सुतां स्मृते
॥२०४
यशो मेधा
समन्वितं।
५

ज्ञातिश्रैष्ठ्यं महद्वित्तं यशो लोके परां गतिं॥ पापेन विप्रमोक्षश्च भवेत्सर्वैर्न संशयः॥
अथातिचीर्यते कर्म पुत्रकामस्य वैष्णवं॥ शुक्लपक्षे शुभे वारे सुनक्षत्रे सुगोचरे॥
द्वादश्यां पुत्रकामस्तु चरुं कुर्वीत वैष्णवं॥ दंपत्योरुपवासः स्यादेकादश्यां सुरालये॥
ऋग्भिः षोडशभिः सम्यगर्चयित्वा जनार्द्दनं॥ चरुं पुंसूक्तेन श्रपयेत्पुत्रकाम्यया॥ प्राशु
याद्वैष्णवं पुत्रमचिरा संततिक्षमं॥ चरुः स्वगृह्योक्तविधिना पयसि चरुः कार्यः॥ श्रपण
समये सूक्तमावर्त्तयेत्॥ सकलसूक्तेनैकाहुतिः॥ एवं सप्तहोमः॥ सचायतजेयाचैका
शः॥ कृष्णैकादश्यामुपक्रम्यायुतं जप्त्वा शुक्लैकादश्यां दंपती उपोष्य [illegible] द्वादश्यां च
रुं सहस्रं जुहुयादिति महार्णवः॥ अथापरः प्रकारोयमेकादश्यामभोजनं॥ दंपत्योः पु
रुषस्तत्र नित्यकर्माविरोधिनि॥ काले जपेदिदं सूक्तमेकादश्यां निरंतरं॥ द्वादश्यां
प्रयतो भूत्वा पयसा निर्वपेच्चरुं॥ [illegible] द्वादशा द्वादशीश्चैवं पयसा निर्वपेच्चरुं॥ एवमेका
दश्युपवासादिना कृत्वाज्यं ~~[illegible]~~ कुर्वीत विधिवच्चात्र ऋग्भिः षोडशभिर्बुधः॥ कृतांजलिपु
टो भूत्वा स्तावं वाग्भिः प्रयोजयेत्॥ समिधोश्वत्थवृक्षस्य हुत्वाज्यं जुहुयात्पुनः॥ उपस्था

रु

॥२०४॥

दस्मिन्मंत्रेतुदेवता॥ आदौवष्टौवसून्विद्याद्रुद्रानेकादशोत्तरे॥ ततश्चाद्वादशादि-
त्याः प्रजापतिरनंतरं॥ वषट्कान्नृस्तन्नमेतुसर्वोहरमयः शिवः॥ एवमेतान्निरूपि-
ता देवानां कथितानवै॥ असहराणि न्यसेन्मंत्रीसर्वांगेषुसमाहितः॥ मूर्धादिपंचस्था-
नेषुप्रथमंपंचवर्कंन्यसेत्॥ दक्षिणस्यकरस्यापि संधिस्थानेषुपंचसु॥ ततःपराणि
पंचैववामहस्तेन्यसेत्ततः॥ ततस्तद्दक्षिणेपादेसंधिस्थानेषुपंचसु॥ पराणिपं-
चविन्यस्यवामपदेतथान्यसेत्॥ ततश्चदक्षिणेपार्श्वेवामपार्श्वेन्यसेत्क्रमात्॥
भ्यां ५ पृष्ठेनाभूवगुह्येवकुक्षौचतौयेन्यसेत्॥ त्रमध्येवपुरेगलेहृदयेमान्यसेत्॥ कान्य ५
एवंविन्यसवर्णानिततोंतेप्रणवंजपेत्॥ सस्यांगेषुन्यसेद्देनंमंत्रीमंत्रंसमाहितः॥
वं एन्तेंड्ष्टमशाक्तास्तवकृत्यारक्षोयताद्रुयः॥ अथकाम्यानिकर्माणिप्रवक्ष्यामि
समासतः॥ श्रीकामोबिल्ववृक्षस्यसमिद्भिरथवाफलैः॥ पत्रैर्वापयसाजुहु-
यान्महतीश्रियमाप्नुयात्॥ गोकामपयसाहोमाल्लभंतेगांपयस्विनीं॥ वि

घायी जुहुयाद्घस्तकरुद्राहैर्गोघृतप्लुतैः॥विघ्नं वायुस्तथा वित्तं लुञ्चते नात्र
संशयः॥अन्नेप्सुकामो जुहुयाद्दन्नमेव घृतप्लुतं॥पलाशसमिधो नूत्वा ब्रह्मव हु
र्चसमाप्नुयात्॥वृष्टिकामस्तु संपूज्य देवदेवं त्र्यंबकं॥अर्घ्यपाद्यादिभिर्देवंच गो
सैजैरभिषेचयेत्॥आपोहिष्ठेतितिसृभिर्वरणपर्वतादिभिस्तथा॥पूजमानानु
वाकेन त्र्यंबके त्पनर्यसंचा॥वैतसीभिः समिद्भिस्तु जुहुयात्पयसाप्लुतैः॥अयुतं
~~वासहस्रं वा जुहुयात्पयसाप्लुतैः~~॥अयुतं वा सहस्रं वा जुहुयात्पयसापि वा॥
पुण्याहं वा वर्षे च ब्राह्मणान्भोजयेत्ततः॥स्वाहान्यंतरे वृष्टिर्नेव सेवनसं
॥१८६॥ शयः॥वृष्टिकामश्चाढ्ढवासाव द्वहसमुद्भवैः॥समिद्भिर्जुहुयान्मंत्री सद्यो ॥१८६॥
वृष्टिमवाप्नुयात्॥नाभिदघ्ने जले स्थित्वा ध्यायन्वै पुष्टिवर्धनं॥जपेत्र्यं त्र्यंब
कं मंत्रं महतीं वृष्टिमाप्नुयात्॥अग्निहोत्रात्समादाय सितंत्त्वं सितमुत्तमं॥अन
यातुस्रवाउत्त्वाग्निनैवृष्टिं निवारयेत्॥पुत्रकामस्तु जुहुयात्सापयसं घृतसमुत

जप ७

पुष्पाद्यैस्त्र्यंबकेत्यनयाऋचा ॥ ततोभिमंत्रयेत्कुंभं मंत्रेणानेन मंत्रवित् ॥ अष्टोत्तरसह
स्रं तु अभिषिंचेत्ततो नरः ॥ प्रोक्षयेद्वाथ कुर्वीत राजानं तु विशेषतः ॥ नापमृत्युभयं तस्य
न च व्याधिकृतं भयं ॥ परार्थे धनलाभेन मोहाद्विज्ञानतोपि वा ॥ मृत्युंजपं कुर्वन्स्वयं
मृत्युमवाप्नुयात् ॥ मातरं पितरं पुत्रं राजाचार्यौ विना सदा ॥ अथरक्षाविधिं वक्ष्ये स
र्वभूतभयापहं ॥ औपासनाग्निहोत्राद्वे गृहीत्वा भस्म वै सितं ॥ ततोभिमंत्र्य तद्भस्म सेवि
तेनांगानि संमृजेत् ॥ अथापरं प्रवक्ष्यामि रोगमृत्युजयापहं ॥ ग्रहप्रेतोरगादिभ्यो
भयं येन न जायते ॥ यथेष्टेन सुवर्णेतोम कारयेदंगुलीयकं ॥ पंचलोहेन वा कुर्या
त्त्रिलोहेनैव वा पुनः ततः संपूज्य देवेशं गंधपुष्पाक्षतादिभिः ॥ त्र्यंबकेनैव मंत्रेण मन
सैव समाहितः ॥ कुंडे वा स्थंडिले वापि विधिवन्मंत्रकोविदैः ॥ गोघृतेनैव जुहुयाध्या
त्वादेवं निरंजनं ॥ शतं सहस्रमयुतं वापि त्वितः ॥ होतुश्च दक्षिणा पार्श्वे होमे वा याज
नेपि वा ॥ कांस्ये वर्णमये वापि पात्रे न्यस्यांगुलीयकं ॥ सर्वाहुतिषु संपातं तस्मिन्नपि
नयेद्बुधः ॥ अंगुलीयं स्पृशन्मंत्रं शतमष्टोत्तरं जपेत् ॥ अंगुल्यां सर्वरक्षार्थं धारये

मृ२ निपुगं ७ त३

दंगुल्लीयकं॥ अनेनैव विधानेनैः सर्वोण्यान्नरत्नानि च॥ नवानि धारयन्नित्यं जीवे
द्वर्षशतं सुखी॥ अथ शांतिं प्रवक्ष्यामि सर्वोपद्रवनाशिनीं॥ अद्भुतेषु च सर्वेषु
दुःस्वप्नेषु द्विजोत्तमः॥ दिव्यांतरिक्षभौमानामद्भुतानां च दर्शने॥ प्रत्यक्षप्रतिमा
नेषु नानारूपेषु सर्वशः॥ भूतप्रेतपिशाचानामावेशशंकिते तथा॥ गृहमध्येग्नि
माधाय श्रपयेत्पायसं चरुं॥ तेनैव जुहुयादग्नौ मंत्रेणानेन संयतः॥ तिलौदनं
वा जुहुयाच्छुद्धौदनमथापि वा॥ अष्टोत्तरशतं मंत्री जुहुयाज्जौघृतेन वा॥ पलाश
पाठ खदिराश्वत्थबिल्वन्यग्रोधसंभवैः॥ अपामार्गसमिद्भिर्वा जुहुयात्तथवा तिलैः॥ ६८
॥ए५॥ अथवानेन मंत्रेण कोटिहोमं तु कारयेत्॥ गव्येन सर्पिषा[illegible] विद्वान्यवव्रीहि ॥ए५॥
तिलैस्तथा॥ अग्निमाधाय जुहुयात्समिच्चरुघृतादिकं॥ भूतप्रेतपिशाचाश्च ये वाप्यं
न्ये ग्रहादयः॥ ते सर्वे होमगंधेन धूमसंस्पर्शनेन च॥ मंत्रस्यास्य प्रभावेन निर्गच्छं
ति गृहात्ततः॥ अथवानेन मंत्रेण पूर्णकुंभं समाहितः॥ अभिमंत्र्य गृहं सर्वं प्रोक्षये
त्तेन वारिणा॥ अथ न्यासविधिं वक्ष्ये मंत्रस्यास्य महामुने॥ अक्षराणि त्रयस्त्रिंश

नेकृताशस्यवैध्यात्वावमधुसूदनं॥ आग्नेयैर्मंत्रैरूपस्थानमितिमहार्णवः॥ युक्तंतुपुरु
षसूक्तेनैव॥ हविर्होमंततःकुर्यात्प्रत्येकंवाग्यतःशुचिः॥ सूक्तेनतुकृपादौस्पमादा
वंतेनैवपूर्ववत्॥ हविश्शेषंनमस्कृत्यनारीनारायणांपतिं॥ उद्दयित्वाहविःशेषंतुघ्राग्री
संविशेत्सहतां॥ आहारांतरत्यागेनहविश्शेषंतुभुक्त्वावामशायिनीस्यादित्यर्थः॥ ततःकृत्वाचवि
दंकर्मकर्तव्यंद्विजतर्पणं॥ द्वितीयांस्त्रीनिवर्तेतयावजन्मनविंदति॥ ययासहेदंकर्मैवकृतं
तांविहायान्यामस्तावपिनोपेयात्॥ सर्वोक्तिःसहकर्तव्येतुनदोषः॥ एतावन्यस्त्रियाअ
गमनेनियमातिक्रमदोषास्त्येव॥ किंचल्पः॥ तत्रैकःशक्तोप्राजापत्यः॥ अशक्तौत्रिरा
त्रद्विरात्रादि॥ अपुत्रामस्तनपुत्रावयाचकन्यांप्रसूयते॥ क्षिप्रंसाजनयेत्पुत्रमृष्यशृं
नी गाययथाव्रतं। वृहसाशारोप्येतंविधिमुक्त्वाह॥ होमांतेदक्षिणांदद्याद्धेनुंवाससस्तथा
तिलान्॥ गौर्हिरण्यवस्त्राणियथासंभवमेववा॥ इतिकमलाकरभट्टकृतेशांतिरत्ने
पुरुषसूक्तविधिः॥ सर्वेश्वजपोपी'दीपस्थाकार्यः॥ तद्यथा॥ युग्मस्वराणांविलिखेच्च

मिं

सर्वेकादींश्चवर्गान्क्रमशःक्षामीशे॥ स्थानाधिपाघाशास्मस्तियत्रतंदीपदेशंमुनयोवदं
ति॥ इदमेवकूर्मचक्रे॥ इयान्नेदोयद्ग्रामनामाघवर्णोकूर्मचैत्रे॥ मुखमिति॥ तदुक्तंशिवचं
द्रिकायां॥ अकारादिस्वरद्वंद्वंपूर्वादिष्वष्टसुन्यसेत्॥ तथाकादीन्सप्तवर्गान्न्यसेच्छिवदि
शं विना॥ ग्रामनामाघवर्णस्तुयस्यांदिश्यवतिष्ठति॥ तत्रकूर्मेमुखंज्ञेयमन्यांगानीत
रत्र च॥ मंत्रसिद्धिंमुखेविद्यात्करयोरल्पकंफलं॥ निष्फलंपादयोर्मध्ये औदासिन्यंतुपा
र्श्वयोः॥ वधबंधनदुःखानिपुच्छदेशेभवंतिहि॥ अस्यापवादस्तत्रैव॥ कुरुक्षेत्रेप्रयागेचगं
गासागरसंगमे॥ महाकालेचकाश्यांचदीपस्थानंनचिंतयेत्॥ इतिदीपस्थानं॥ अथरुद्रवि
॥२०५॥ धिः॥ सचराचरात्माख्यरुद्रस्तास्करविद्यारण्यभाष्येमाङ्क्षिमहार्णोवाघालेभ्वनेनोच्यते॥ त
त्ररुद्रस्यजपेहोमेभिषेकेचश्रुतिस्मृत्यादौविनियोगोदृश्यते॥ तत्रजाबालश्रुतिः॥ किंजप्येना ॥२०५॥
मृतत्वंनोब्रूहि शतरुद्रियकेणेत्येतानिहवाअमृतनामधेयान्येतैर्हवाअमृतोभवतीति॥
कैवल्योपनिषदि॥ यःशतरुद्रियमधीतेसोग्निपूतोभवतिस्वर्णस्तेयात्पूतोभवतिब्रह्महत्या
याःपूतोभवतिकृत्यात्पूतोभवति॰ अनेनज्ञानमाप्नोतिसंसारार्णवनाशनंतस्मादेनंविदित्वै

कैल्या

पा ॥ श्रीवगीतासुवेस्तुरुद्रंॐ पेन्विस्यं ध्यायमानो ममाद्भुतिं। षडक्षरे नाप्रलयं निष्कामो विजितेंद्रियः ॥ अथाथर्वशिरोनमैत्रैकैव
नारश्यूनम। सततं नैवचंदेहेन शोभः संजायते ध्रुवं। नायन्नायेत्सन्नैधुग्रहदोषेषु दुःस्वप्नाद्भुतदर्शने। जपन्रुद्रान्समुद्दिष्टः स
दोषैः प्रमुच्यते। यमः। कृत्वा पंचाशत्रिंशत्पापं त्रितिरिक्तसे पांच वाक्कपिं। हातन्नतरन्नस्तं इदं जप्त्वा मुच्यते सर्वपातकैः॥ तुक्ति पारत्पपर

वकैवल्यफलमश्नुतइतिहेमाद्रौ बौधायनः॥ अथातः पंचांगरुद्राणां जपहोमार्चनं विधिं व्याः
ख्यास्यामः॥ विधिज्ञाद्रस्यजपाद्यैः प्रत्येकमन्वयः॥ अर्चनमभिषेकः इतिमहात्मोक्तः॥ शाता
तपपराशरः॥ मद्यंपीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा॥ नस्मच्छन्नो
रुद्रमेकादश्यांशयानो रुद्राध्यायी मुच्यते सर्वपापैः॥ इदं रहः कृते मासमात्रं ज्ञेयं॥ रुद्राध्यायी
जवेत् तपामासमेकं मतं द्विजः॥ प्रायश्चित्तं च वेदेत इह सस्यनः संशयइतिपराशरः पु
राणात् हेमाद्रौ कौशिकबौधायनौ॰ रुद्रैकादशिनी त्वेषा सर्वकामफलप्रदा॥ सर्व
पापक्षयकारी सर्वशांतिप्रदायिनी॥ विष्णुधर्मोत्तरेपि॥ रुद्राणां च तथा जप्यं सर्वाघवि
निषूदनं॥ सर्वकामकरो होमस्तथा सर्वत्र शांतिदः॥ अजाविकानामश्वानां कुंजराणां
तथा गवां॥ मनुष्याणां नरेंद्राणां बालानां योषितामपि॥ ग्रामाणां नगराणां च देशाना
मपि च ज्ञार्णव॥ उपद्रुतानां धर्मज्ञ व्याधितानां तथैव च॥ मरके समनुप्राप्ते रिपुजे च तथा
ज्वे॥ रुद्रहोमः पराशांतिः पायसेन घृतेन वा॥ तेन जपरुद्रहोमरुद्राभिषेक रुद्रश्चेति
कालिकापुराणेपि यः पुनः सततं भक्त्या आपृच्छ्य रात्रौ रोरवं रात्रेधप्याये सदा रुद्रान्योपि यातिपरं पदं। अथहेतोफ
हि फं पुष्कलं तथा॥ तामेव हि जपे द्रुद्रान्जनश्रुतिरिव लसमाहितः। अथ वेदं ॐगत्सुर्यं च रीकर्तुं समीहते। ततारुद्रं

जपोगा
यश्र्याीश्र
दिवोषतः॥
सर्वपाप
हराप्येरु
द्रैकादशि
नीतथा॥
६
६४

हेमाद्रौ
कौं शिवे

ॐ पृदाकोध्यायमानो महेश्वरः ।१

रु॰अ॰१ त्रिचोक्तः ॥ आघोघ्निया ॥ केवलजपान्म कोहोमांगकैश्च ॥ अयंगिरसो ॥ एकादशगुणा

धर्म॰२ न्वापि रुद्रानावर्त्यैवित ॰ महापापैरपिस्पृष्टो मुच्यते नात्र संशयः ॥ सर्वपापानि नश्यं

ति रुद्रैकादशिनीं जपादिति कलिकापुत्तौ सेदौ जपमात्रोक्तेः ॥ जपाद्दशांशतो होमस्त

तर्पणं ४ त्या होमाच्चैतर्पणात्स्य दशांशेन मार्जनं कथितं किल ॰ मार्जनस्य दशांशेन ब्राह्मणान

पिच्चोजयेत् ॰ जपो वा पूर्वको होमः तर्पणं वाभिषेचनं ॥ तद्देवप्रजपैनैव प्रकारोक्त

पुरस्क्रिया ॥ होमाशक्तौ जपं कुर्याद्धोमसंख्याचतुर्गुणं ॰ एवं चकृते तु मंत्रस्य जायते सि

गो॰ द्धिरुत्तमेति पुरश्चरणा ॥ चंद्रिकादौ जपमात्रे दशांशहोमोक्तेः ॥ तेन तर्पणाद्यपि सिद्धं ॥

॥२०६॥ कामरुद्रे तु तर्पणाद्यनाशंक्यमेवं ॥ जपमात्रे तदुक्तेः ॥ अन्येत्तु पुरश्चरणा एवायं विधिः ॥ अत एव ॥२०६॥

हेमाद्रिमहार्त्तवादौ तर्पणाद्यनुक्तिः ॥ तेन तदुक्तेजपाहोमौ विप्रभोजनं चेत्येवकार्यमित्याहुर्वृद्धाः

